卐 ॐ श्रीसीतापतये नमः 卐

भगवद्रामानन्दाचार्यविरचितानन्दभाष्यसंवलिता

ऐतरेयोपनिषत्

ॐ आत्मा वा इदमेक एवाग्र आसीत् । नान्यत् किञ्चन मिषत् ।

स ईक्षत लोकान्नु सृजा इति । स इमान् लोकानसृजत । अम्भो मरीचीर्मरमापः । अदोऽम्भः परेण दिवम् । द्यौः प्रतिष्ठा । अन्तरिक्षं मरीचयः पृथिवी मरः । या अधस्यात् ता आपः ।

स ईक्षत । इमे नु लोकाः । लोकपालान्नु सृजा इति । सोऽद्भ्यः पुरुषं समुद्धृत्याऽमूर्च्छयत् । तमभ्यतपत् । तस्याभितप्तस्य मुखं निरभिद्यत यथाऽण्डम् । मुखाद् वाक् । वाचोऽग्निः । नासिके निरभिद्येयाताम् । नासिकाभ्यां प्राणः । प्राणाद् वायुः । अक्षिणी निरभिद्येयाताम् । अक्षीभ्यां चक्षुः ।

चक्षुष आदित्यः । कर्णौ निरभिद्येयाताम् । कर्णाभ्यां श्रोत्रम् । श्रोत्राद्दिशः । त्वङ् निरभिद्यत त्वचो लोमानि । लोमभ्य ओषधिवनस्पतयः । हृदयं निरभिद्यत । हृदयान्मनः । मनसश्चन्द्रमाः । नाभिर्निरभिद्यत । नाभ्या अपानः । अपानान्मृत्युः । शिश्नं निरभिद्यंत । शिश्नाद् रेतः । रेतस आपः ॥१॥

इति ऐतरेयोपनिषदि आत्मषट्के प्रथमः खण्डः

卐 सर्वेश्वर श्रीसीतारामाभ्यां नमः 卐

प्रस्थानत्रयानन्दभाष्यकाराय नमोनमः

आनन्दभाष्यसिंहासनासीन

जगद्गुरुश्रीरामानन्दाचार्यश्रीरामेश्वरानन्दाचार्य

प्रणीता-लघुदीपिका

सीतारामसमारम्भां शुकबोधायनान्विताम् ।
रामानन्दार्यमध्यस्थां वन्दे गुरुपरम्पराम् ॥

यह परिदृश्यमान समस्त संसार सृष्टि से पूर्व प्रसिद्ध एकमात्र आत्मा-कल्याणगुणों से युक्त परब्रह्म ही था उसके सिवाय थोडासा भी व्यापार वाला कुछ भी नहीं था उस परब्रह्म ने विचार किया कि प्राणियों के आश्रय लोको की रचना करुं तब उसने द्युलोक से ऊपर

के लोक अन्तरिक्ष मर्त्यलोक तथा वरुणलोक इन लोकें की रचना की सर्ग से ऊपर के लोक सबका आधाररूप द्युलोक यह अम्भलोक है अन्तरिक्षलोक ही मरीचिलोक है एवं पृथिवी ही मृत्युलोक है जो पृथिवी के नीचे है वह जललोक है। उस सृष्टि कर्ता परब्रह्म श्रीरामजी ने पुनः विचार किये कि अम्भ मरीचि मर तथा आप लोक की सृष्टि तो की अब लोकपालों की सृष्टि करुं यों विचार कर उस परब्रह्म ने जल से ही पुरुषस्वरूप ब्रह्मा को समुद्धार कर उसे मूर्तिमान् बनाया।

उस ब्रह्मा के उद्देश्य से परब्रह्म ने संकल्प किया उस संकल्प से जैसे अण्डा फूटकर पक्षिशाक निकलता है वैसे ही उस पिण्ड से चतुर्मुख छिद्र उत्पन्न हुआ मुख से वाणी उत्पन्न हुई एवं वाणी से अग्नि प्रकट हुई अनन्तर नाशिका के दो छिद्र प्रकट हुई तथा नाशिका छिद्रों से प्राण प्रकट हुआ और प्राण से वायु उत्पन्न हुआ एवं आंखों के दो छिद्र उत्पन्न हुये नेत्र से सूर्य तथा दोनों कान प्रकट हुये तथा कानों से श्रोत्रेन्द्रिय प्रकट हुआ श्रोत्र से दिशाएं उत्पन्न हुई अनन्तर त्वचा प्रकट हुई त्वचा से बाल उत्पन्न हुये रोमों से ओषधियां एवं वनस्पतियां उत्पन्न हुई पुनः हृदय उत्पन्न हुआ हृदय से मन प्रकट हुआ मनसे चन्द्रमा उत्पन्न हुआ तब नाभि प्रकट हुई नाभि से अपान प्रकट हुआ एवं अपान से मृत्यु उत्पन्न हुआ उसके वाद लिङ्ग उत्पन्न हुआ लिङ्ग से वीर्य उत्पन्न हुआ वीर्य से जल उत्पन्न हुआ ॥१॥

लीलामिच्छुर्विधातुं जगदिदमखिलं सन् सिसृक्षुः कृतेक्षः
क्ष्मादिभ्यो वीक्षयैव प्रथममरचयल्लोकपालान् स लोकान्।
स्थानान्येषामथान्नानि च विरचितवान् क्षुत्पिपासोपशान्त्यै
स्वात्मारामोऽपि रामः स भवतु सततं श्रेयसे ब्रह्म साक्षात्।१।

卐 सर्वेश्वर श्रीरामाय नमः 卐

श्रीहनुमते नमः

आनन्दभाष्यसिंहासनासीन

जगद्गुरुश्रीरामानन्दाचार्यश्रीरामेश्वरानन्दाचार्य

प्रणीत प्रकाश

सीतारामसमारम्भां शुकबोधायनान्विताम् ।
रामानन्दार्यमध्यस्थां वन्दे गुरुपरम्पराम् ॥

लीला करने की इच्छा वाले सर्वेश्वर श्रीरामजी ने विचारपूर्वक सकल जगत् को बनाने के लिये पृथिव्यादि के पूर्व में सकल लोकपाल तथा लोक को बनाया तथा इनके स्थान को बनाया तथा भूख पिपासा शान्ति के लिये अन्न का निर्माण किया एतादृश स्वात्माराम सर्वेश्वर श्रीरामजी जो कि साक्षात् ब्रह्मस्वरूप हैं वे सदा कल्याण के लिये हों ॥१॥

आराध्यं ब्रह्मरुद्रादेर्जगद्धेतुं च मुक्तिदम् ।
दिव्यदेहं गुणाम्भोधिं रामं ब्रह्म समाश्रये ॥२॥

जो भगवान् श्रीरामजी ब्रह्मादि देवों से आराधित हैं जगत् के अभिन्न निमित्तोपादानकारण हैं दिव्य मङ्गल विग्रहवान् तथा अनन्तकल्याणगुण के पारावार हैं उनका आश्रय लेता हूँ ॥२॥

सूत्रवृत्तिकृतौ नत्वा व्यासबोधायनौ मुनी ।

श्रीमन्तं राघवानन्दाचार्यं गुरुं नमाम्यहम् ॥३॥

सूत्रकार तथा वृत्तिकार श्रीव्यासजी तथा श्रीबोधायन मुनिजी को नमस्कार करके गुरु श्रीराघवानन्दाचार्यजी को प्रणाम करता हूँ ॥३॥

कुर्वे गुरुं नमस्कृत्य ज्ञानभक्तिदयानिधिम् ।
ऐतरेयोपनिषदो भाष्यमानन्दसंज्ञकम् ॥४॥

ज्ञान भक्ति तथा दया के सागर गुरुजी को प्रणाम करके ऐत्तरेय उपनिषत् का आनन्द नामक भाष्य को बनाता हूँ ॥४॥

इदं दृश्यमानं जगत् । अग्रे सृष्टेः प्राक् । एक आत्मा एवासीत् प्रलयकाले परमात्मा सहैकीभावेन नामरूपविभागरहिततया एकत्वेन व्यवहारास्पदभूत आत्मा आप्नोति व्याप्नोति सर्वमित्यात्मा स्वज्ञान शक्त्या स्वरूपतश्च सर्वव्यापकः । एतेन सर्वज्ञत्वमस्य स्वाभाविको धर्म इत्युक्तं भवति । यद्वा अत्ति सर्वं जगदित्यात्मा सर्वसंहरणकर्तेति । आदत्ते वा सर्वमित्यात्मा । आदानमिह अव्याकृतेभ्यो नामरूपकरणाय ग्रहणम् । सर्वाविर्भावकारणत्वमुक्तं भवति । अतति सर्वमित्यात्मा वा । अत् सातत्यगमन इति धातुः । सर्वव्यापकता भक्तपरित्राणार्थमवतारग्रहणकर्तृताचेति फलति । स्मृतिश्चात्र भवति 'यच्चाप्नोति यदादत्ते

यच्चात्ति विषयानिह । यच्चास्य संततोभावस्तस्मा दात्मेति कीर्त्यते' इति । एवकारेणेतरद् व्यवच्छिनत्ति । सर्गकाले स्थूलाचिदचिद्विशिष्टोऽयं परमात्मा सर्गप्राक् काले सूक्ष्मचिदचिद्विशिष्ट एवासीद् इत्यन्तर्गतोऽर्थः । एवकारव्यवच्छेद्यमर्थं श्रुतिः स्वयमेव दर्शयति-नान्यत् किञ्चनमिषदिति । निमेषोन्मेषव्यापारजातं मिषधातु नाऽभिप्रेतम् । सर्गकाले चेतनजातं यथा कार्यकरणोप युक्तव्यापारविशिष्टं भवति सशरीरत्वात् तथा सर्गप्राक् काले न तादृशव्यापाराविष्टं शरीररहितत्वादिति वा क्यार्थः । व्यापारराहित्यमात्रमेवकारेण निषिध्यते न तु सत्तैव परमात्म व्यतिरिक्तस्य सूक्ष्मरूपेण चिदचितां तदानीमपि भावात् । एतेन परमात्मव्यतिरिक्तं किमपि नासीदितिपरोक्तव्याख्यानमपास्तं भवति । व्यापार निषेध उपलक्षणं नामरूपविभागस्यापि । तेन शरी रेन्द्रियराहित्यं बोधितं भवति ।

स सूक्ष्मचिदचिद्विशिष्टः परमात्मा । ईक्षतेत्यत्र छान्दस आडागमाभावः । ऐक्षत संकल्पं कृतवान् । संकल्पप्रकारमेवाह-लोकान्नु सृजा इति । इतिशब्दः संकल्पस्वरूपप्रदर्शनपरः । लोकान् सृजानि प्राणिनां कर्मफलोपभोगयोग्यान् स्थानविशेषान् लोकशब्द वाच्यान् करवाणीत्येतत् । 'सृजै' इत्यत्रात्मनेपदं

छान्दसम् । स परमात्मा तथा संकल्पविशिष्टः सन् इमान् वक्ष्यमाणाभिधानान् लोकान् भोगाश्रयभूतान सृजत सृष्टवान् । यथा कुलालः सृज्यमानघटोदञ्चनादि विषयकं संकल्पं 'करोति' इदं प्रथमतः कुर्यां तत इदम् इत्यादिकं ततश्च संकल्पितमर्थं संकल्पक्रमेण सृजति तथैव परमात्माऽपि संकल्पपूर्वकं लोकसर्गमकरोदित्ये तत् । यद्यपि कुलालादिः कृतसंकल्पोऽपि मृदादिसा मग्रीवैकल्ये प्राप्ते नापि सृजति विलम्बतो वा सृजति न तथा परमात्माऽस्य सत्यसंकल्पत्वादितरसामग्रीसह कारानपेक्षत्वाच्च । सर्वशक्तिरयं गीयते । सत्यसंकल्प ताऽपि सहकार्यान्तरापेक्षामस्य निवारयति । ततः कृते संकल्पेऽयमविलम्बेनैव सृजति । न वा सृजति । न वा विलम्बेन सृजति । सृष्टानां लोकानां नामानि निर्दि शति-अम्भ इत्यादिना । अम्भः, मरीचिः, मरः, आ पः, इतीमान् लोकानसृजत । सृष्टानां लोकानामम्भ इत्यादि नामकरणहेतुभूतानर्थान् स्वयमेव व्याचष्टे श्रुतिः-अदोऽम्भ इत्यादि । परेण दिवं द्युलोकादुप रिष्टाद् वर्तमाना ये लोकाः तेषां प्रतिष्ठा आश्रयभूता द्यौः द्युलोकश्च अदोऽम्भः । अम्भःशब्देन व्यपदेश भाजस्ते सर्वे । अयमेवाम्भःशब्दार्थ इत्येतत् । अम्भः शब्दवाच्यलोकस्थिता देवा वृष्टिद्वारा भौमाः प्रजा

भावयन्ति तस्मादम्भःप्राधान्यात्तेषां लोकानामम्भ इति संज्ञा । अम्भःशब्दश्च जलपर्यायः । अन्तरिक्षमन्तरिक्षलोक एव मरीचयो मरीचिलोकः । आदित्यकिरणपरिव्याप्तोह्यन्तरिक्षलोकः तस्मान्मरीचिपदभाक् । मरीचय इति बहुवचनं तु मरीचिव्याप्तान्तरिक्षलोकस्य प्रदेशनानात्वमभिप्रेत्य । मरीचीरित्यत्र दीर्घश्छान्दसः । पृथिवी मरो म्रियन्ते भूतानि यत्र स मरः । पृथिव्यां हि मरणधर्माण एव जायन्तेऽतो जायमाना म्रियन्ते तस्मात् पृथिवी भूलोको मरशब्देनोच्यते । मुक्तिकामैः शरीरस्य विनाशित्वं विनिश्चित्य मोक्षार्थं द्रुतगत्या प्रयतनीयमित्यभिप्रायो भूलोकस्य मरेतिसंज्ञाविधौ गम्यते । या अधस्तात् ता आपः । भूलोकस्याधोभागं वर्तमाना ये लोका अतलवितलादिपातालान्ताः ते सर्वे आप इत्युच्यन्ते । यतस्तेलोका अपः प्रविश्य समुद्र मध्ये गन्तव्या भवन्ति ततस्तेषामप्शब्दव्यपदेशः । अयञ्च लोकसर्गो पञ्चभूतसृष्ट्यनन्तरमेव तत एव लोकसिसृक्षापि महदादिसृष्टेः पश्चादेव ।

स परमात्मा भोगस्थानभूतानम्भःप्रभृत्तीन् लोकान् सृष्ट्वा पुनरपि ईक्षत संकल्पमकरोत् । संकल्पाकारमाह-इमे नु लोकाः । अम्भःप्रभृतय इमे लोका मया सृष्टाः सन्ति अतः परमेषां लोकानां

पालकान् सृजै सृजानीति । लोकपालकानामभावे सृष्टा अपि लोका असृष्टा एव रक्षकाभावे तेषां विना शस्याचिरभावित्वात् । एवं लोकपालसर्गसंकल्पवान् स परमात्मा । अद्भ्य एवेत्यत्र अप्पदं पञ्चीकृतभूतानामुपलक्षकं तेन पञ्चीकृतेभ्योभूतेभ्य एव येषां भागतश्चतुर्विधलोकसृष्टिस्तेभ्य इत्येतत् । पुरुषं चिकीर्षित पुरुषाकृतिः पञ्चीकृतभूतभागविशेषं समुद्धृत्य समादाय अमूर्च्छयत् पुरुषाकृतिकरणोपयुक्तं दण्डवल्लम्बायमानमित्येतत् । पिण्डं कृतवान् । कुलालो यथा घटादिचिकीर्षया मृदः समुद्धरति मृद्भागं तञ्च घटादिकरणोचितपिण्डाकारं करोति तद्वत् । पिण्डकरणानन्तरं पुरुषाकारौपयिकानवयवानपिमुखादीन् तत्राकरोदिति वक्तुमाह-तमभ्यतपदिति । तं पिण्डं पुरुषाकारं विधातुमभ्यतपदभिध्यातवान् । संकल्पितवानित्येतत् । यस्य ज्ञानमयं तप इति श्रुतेः । अभिध्यानं संकल्पः तपश्च ज्ञानविशेषरूपः समानार्थ एव । तस्य पिण्डस्य अभितप्तस्य परमात्मनः पुरुषाकारसंकल्पगोचरस्य संकल्पप्रभावादेव मुखं निरभिद्यत मुखाकारं विवरमजायत । तत्र दृष्टान्तमाह-यथाऽण्डम् । पक्षिणः शावकगर्भमण्डं शावकनिस्सरणसमयपरिपाके सति यथा भिद्यते शावकनिर्गमनोपयुक्तविवरविशिष्टं भवति

तथैव वागादिनिस्सरणोपयुक्तमुखाकारविवरविशिष्टः पिण्डोऽभवत् । परमात्मसंकल्पमात्रेणेतिभावः । मुखान्निर्भिन्नाद् वागिन्द्रियस्थानभूताद् वाक् वागिन्द्रियं निरभिद्यत । समुत्पन्नमित्येतत् । वाचः समुत्पन्नाद् वागिन्द्रियादग्निर्वागिन्द्रियाधिष्ठाता देवो यो लोकपालतया व्यवह्रियते लोकविशेषपालकत्वात् स समुदपद्यत । एवमग्निरूपलोकपालसर्गं कृत्वा वायुं लोकपालमसृजदिति दर्शयति-'नासिके' इति । नासिके निरभिद्येयाताम् । नासिकाकारविवरविशिष्टः स पिण्डः परमात्मसंकल्पवशादभूत् । नासिकाभ्यां घ्राणेन्द्रियगोलकरूपाभ्यां प्राणः प्राणवृत्तिविशिष्टं घ्राणाख्यमिन्द्रियमजायत । घ्राणाद् घ्राणेन्द्रियाद् वायुघ्राणेन्द्रियस्याधिष्ठाता देवो लोकपालविशेषोऽजायत । एवं सर्वत्र इन्द्रियस्थानमिन्द्रियं तदधिष्ठातृदेवश्चेतिक्रमेण त्रितयं निर्भिन्नमभवत् । आदित्यात्मकस्य लोकपालस्य सृष्टिं ततः कृतवानिति वदति-अक्षिणी इति । अक्षिणी निरभिद्येयातामक्ष्याकारविवरविशिष्टः पिण्डोऽभवत् । अक्षि चक्षुरिन्द्रियस्थानभूतं गोलकमुच्यते चक्षुःशब्देन चक्षुरिन्द्रियमुच्यते दर्शनसाधनीभूतम् । अक्षिभ्यां चक्षुः चक्षुरिन्द्रियाधिष्ठानभूताभ्यां गोलकाभ्यां चाक्षुषप्रत्यक्षकरणमिन्द्रियं चक्षुरजायत । चक्षुष इन्द्रियात्

तदधिष्ठाता देवो लोकपालविशेष आदित्यः सूर्याऽपरपर्यायः समुत्पन्नः । कर्णौ निरभिद्येयातां कर्णाकारविवरद्वयमस्य पिण्डस्याभूत् । कर्णौचात्र श्रोत्रेन्द्रियस्थानभूतगोलकद्वयात्मकौ । कर्णाभ्यां श्रोत्रं श्रोत्रेन्द्रियमुत्पन्नम् । श्रोत्राद्दिशः श्रोत्रेन्द्रियाद् दिगभिमानी देवविशेषो लोकपालत्वेन संमत उत्पन्नः ।

त्वङ् निरभिद्यत त्वग् गोलकमुत्पन्नम् । त्वचः त्वग् गोलकाल्लोमानि लोमसहचरितं स्पर्शनेन्द्रियं यतः शीतोष्णादिस्पर्शविज्ञानं सम्पद्यते तदुत्पन्नम् । लोमभ्यो लोमसहचरितत्वगिन्द्रियत ओषधिवनस्पतय ओषधिवनस्पत्यभिमानी देवविशेषः स्पर्शनेन्द्रियस्याधिष्ठाता लोकपालविशेषतया संमतः समुत्पन्नः ।

हृदयं निरभिद्यत परमात्मसंकल्पत एव हृदयमन्तःकरणस्याधिष्ठानभूतं हृत्कमलमुत्पन्नम् । हृदयात्मनो हृत्कमलान्मनोऽन्तःकरणमुत्पन्नम् । मनसोऽन्तःकरणाद् हृत्कमलस्थाच्चन्द्रमा मनोधिष्ठाता देवो लोकपालविशेषः समजायत । नाभिरभिद्यत नाभिरिह गुदमूलं तस्यैव सर्वप्राणबन्धनस्थानत्वात् । ततोऽपानोऽपानवायुसहचरितमिन्द्रियं पायुरिति । ततस्तदधिष्ठातृदेवविशेषो मृत्युर्लोकपालः प्राभवत् । शिश्नमुपस्थेन्द्रियस्थानम् । ततो रेतो रेतस्सहचरितमिन्द्रियमुपस्थाऽऽख्य

मुच्यते । तदेव प्रजननेन्द्रियम् । तस्मादापोऽबभिमानि देवविशेषः समभवत् । एवं करणस्थानानि करणानि तदभिमानिनो देवविशेषा लोकपालाश्च समुत्पादिताः परमात्मना संकल्पविशेषवशात् ॥१॥

卐 इति भगवद्रामानन्दाचार्यविरचिते ऐतरेयोपनिषद्भाष्ये आत्मषट्के प्रथमः खण्डः ॥१॥ 卐

यह परिदृश्यमान जडचेतनात्मक स्थूल सूक्ष्म साधारण जगत् सृष्टि के पूर्व में एक परमात्मा के स्वरूप ही था । प्रलयकाल में परमात्मा के साथ एकीभूत होने से एकत्व रूपसे व्यवहारास्पद था । सब पदार्थ को जो व्याप्त करे उसे आत्मा कहते हैं स्वकीय ज्ञानरूप शक्ति सर्वव्यापक हैं । इस कथन से सिद्ध होता है कि-सर्वज्ञत्व इसका स्वाभाविक धर्म है । यद्वा सबको जो खाये उसे आत्मा कहते हैं अर्थात् सर्वसंहरणकर्ता । अथवा सबका जो ग्रहण करे उसे आत्मा कहते हैं । यहां आदान शब्द का अर्थ है अव्याकृत से नामरूप का संपादन करने के लिये ग्रहण करना चाहिये । एतावता सर्वपदार्थ के आविर्भाव कारणत्व कहा जाता है । अथवा **अततिसर्वमित्मात्मा** अत् धातु सातत्य गमन अर्थ में है। इससे सर्वव्यापकत्व तथा भक्त परित्राण करने के लिये अवतार ग्रहण कर्तृत्व परमेश्वर में फलित होता है ।

स्मृति भी कहती है 'जो यह सबको प्राप्त करता है जो सबका आदान करता है जो सब विषय का संहरण करता है जो इसका संततभाव है इसलिये इसे आत्मा कहते हैं।' एवकार से इतर का व्यवच्छेद (निराकरण) होता है। सर्गकाल में स्थूल चिदचिद्विशिष्ट यह परमात्मा सर्ग के पूर्वकाल में सूक्ष्म चिदचिद्विशिष्ट ही थे यह अन्तर्गत अर्थ है। एवकार व्यवच्छेद्य अर्थ को श्रुति स्वयमेव बतलाती है-**'नान्यत् किञ्चन'** इत्यादि। निमेष उन्मेष व्यापार जातमिष धातु से अभिप्रेत है। सर्गकाल में चेतन समुदाय सशरीर होने के कारण कार्यकरणोप योगी व्यापार विशिष्ट होता है उस तरह से सर्ग के पूर्व समय में शरीर रहित होने के कारण से तादृश व्यापार विशिष्ट नहीं रहता है ऐसा-वाक्यार्थ है। चेतन में व्यापार राहित्य मात्र का एवकार से निषेध किया जाता है न तु उसकी सत्ता का निषेध होता है परमात्म व्यति रिक्त पदार्थ का। क्योंकि सर्ग पूर्वकाल में चिदचित्पदार्थ की सत्ता से ही रहती है। इससे परमात्म व्यतिरिक्त कोई भी पदार्थ सर्ग के पूर्व में नहीं था यह जो परोक्त व्याख्यान है वह परास्त होता है। व्यापार निषेध है वह उपलक्षण है नामरूप विभाग का। इससे शरीरादि राहित्य बोधित होता है उस परमात्मा ने भोगस्थान

लक्षण अम्भः प्रभृतिक लोक का सर्जन करके पुनः संकल्प किया। संकल्प के आकार को बतलाते हैं-'**इमे नु लोका**' इत्यादि। अम्भः प्रभृतिक ये लोक हमसे सृष्ट उत्पादित हुए, इसके बाद इन लोगों के पालक का सर्ग में करुं क्योकि लोकपालक के अभाव में उत्पादित भी ये लोक अनुत्पादित के समान ही हैं क्योंकि रक्षक के अभाव में इनका अभाव विनाश हो जायगा। '**सोऽद्‌भ्यः**' इत्यादि। इसप्रकार लोकपाल सर्वविषयक संकल्पवान् परमात्मा अदभ्य जल से। यहां अप् पद पञ्चीकृत भूतों का उपलक्षक है इस लिये पञ्चीकृतभूतों के भाग से चतुर्विध लोकों की सृष्टि होती है तादृश भूतों से ही पुरुष को चिकीर्षित पुरुषा कार पञ्चीकृत भूत भाग विशेष को ले करके पुरुष के आकार बनाने में उपयुक्त दण्ड के सदृश लम्बायमान पिण्ड को बनाया। जिस तरह कुलाल घट बनाने की इच्छा से मृत्तिका को घटादि करणोचित्त पिण्डाकार बनाता है उसी तरह प्रकृत में परमात्मा ने किया। पिण्डाकार करण के अनन्तर पुरुषाकार के उपयोगी मुखा दिक अवयवों का निर्माण किया। इस बात को बतलाने के लिये कहते हैं- '**तमभ्यपतदिति**' उस पिण्ड को पुरुषाकार बनाने के लिये परमात्मा ने संकल्प किया। अभिध्यान का अर्थ है

संकल्प तथा तप का अर्थ है ज्ञानविशेष यह समानार्थक है । अभितप्त उस पिण्ड का अर्थात् परमात्मा के पुरुषाकार संकल्पविषय पिण्ड का तादृश संकल्प बलसे मुख निर्भिन्न हुआ अर्थात् मुखाकार विवर उत्पन्न हुआ । उसमें दृष्टान्त बतलाते हैं-**'यथाण्ड मिति'** जिस प्रकार शावक गर्भभूत अण्ड शावकानिः सरण समय में जिस तरह निर्भिन्न हो जाता है बच्चों के निकलने में उपयोगी विवर विवर विशिष्ट हो जाता है उसी तरह वागादिक के निकलने में उपयोगी मुखाकार विवर विशिष्ट पिण्ड हो गया परमात्मा के संकल्पमात्र से। वागिन्द्रिय के स्थानभूत निरभिन्न मुख से वागिन्द्रिय की उत्पत्ति हुई । समुत्पन्न वागिन्द्रिय से अग्नि जो कि वागिन्द्रिय का अधिष्ठाता देव लोकपाल है वह समुत्पन्न हुआ । इसप्रकार अग्निरूप लोकपाल के सर्ग को करके वायु लोकपाल सर्ग को बतलाते हैं-**'नासिके'** इत्यादि । नासिकाकार विवर विशिष्ट वह पिण्ड परमात्मा के संकल्प से उत्पन्न हुआ । घ्राणेन्द्रिय गोलकरूप नासिका से प्राण प्राणवृत्ति विशिष्ट घ्राण नामक इन्द्रिय की उत्पत्ति हुई । घ्राणेन्द्रिय से वायु घ्राणेन्द्रिय के अधिष्ठाता देव लोकपाल देव विशेष समुत्पन्न हुआ । इसी तरह सर्वत्र इन्द्रिय का स्थान इन्द्रिय तथा लोकपाल अधिष्ठाता देव

विशेष ये तीनों उत्पन्न हुए। इसके बाद आदित्यरूप लोकपाल की सृष्टि की। इस बात को बतलाते हैं- **'अक्षिणि'** इत्यादि। चक्षुरिन्द्रिय के स्थानभूत गोलक को अक्षि कहते हैं तथा दर्शन का साधन चक्षुरिन्द्रिय चक्षुः शब्द से कहा जाता है। अक्षि से चक्षु का अधिष्ठानभूत गोलक और चाक्षुष प्रत्यक्ष का करण चक्षुरिन्द्रिय की उत्पत्ति हुई। चक्षुरिन्द्रिय से उसके अधिष्ठाता लोकपाल विशेष आदित्य समुत्पन्न हुए। उसके वाद इस पिण्ड के कर्णाकार दो विवर हुए, कर्ण शब्द का अर्थ है श्रोत्रेन्द्रिय का स्थान विशेष गोलकद्वय, कर्ण से श्रोत्रेन्द्रिय की उत्पत्ति हुई। श्रोत्र से दिशा, दिग भिमानी देव विशेष लोकपाल उत्पन्न हुआ। उसके वाद त्वक् गोलक उत्पन्न हुआ त्वक् गोलक से लोम अर्थात् लोम सहचरित स्पर्शनेन्द्रिय की उत्पत्ति हुई जिससे शीतोष्णादि ज्ञान होता है। लोम से लोमसहचरित त्वगिन्द्रिय से ओषधि वनस्पति तदभिमानी देव विशेष स्पर्शनेन्द्रिय के अधिष्ठाता लोकपाल उत्पन्न हुए। उसके वाद परमात्मा के संकल्प से अन्तःकरण के अधिष्ठान हृदय कमल उत्पन्न हुआ। उससे अन्तःकरण मन उत्पन्न हुआ। हृदयकमल स्थित मनरूप अन्तःकरण से चन्द्रमा मनके अधिष्ठाता देव विशेष लोकपाल की उत्पत्ति हुई।

उसके वाद नाभि उत्पन्न हुई । नाभि शब्द का अर्थ है गुदा का मूल क्योंकि गुदामूल ही सर्वप्राण का बन्धन स्थान है । उससे अपान अपान वायु सहचरित इन्द्रिय पायु की उत्पत्ति होती है । ततः पायु के अधिष्ठाता देव विशेष मृत्यु लोकपाल की उत्पत्ति हुई । उसके वाद शिश्न उपस्थ इन्द्रिय का स्थान उत्पन्न हुआ । उसके वाद रेतस रेतः सहचरित उपस्थ इन्द्रिय की उत्पत्ति हुई । इसीका नाम है प्रजनन । उससे आप तदभिमानी देव विशेष उत्पन्न हुआ । इसप्रकार से करण स्थान करण और तदभिमानी देव विशेष लोकपाल को परमात्मा ने संकल्प से पैदा किया ॥१॥

卐 अथ द्वितीयः खण्डः 卐

ता एता देवताः सृष्टा अस्मिन् महत्यर्णवे प्रापतन् । तमशनायापिपासाभ्यामन्ववार्जत् । ता एनमब्रुवन् आयतनं नः प्रजानीहि । यस्मिन् प्रतिष्ठिता अन्नमदामेति ।

ताभ्यो गामानयत् । ता अब्रुवन् 'न वै नोऽयमलमि'ति । ताभ्योऽश्वमानयत् । ता अब्रुवन् न वै नोऽयमलमिति । ताभ्यः पुरुष

मानयत् । ता अब्रुवन् 'सुकृतं बते'ति । पुरुषो वाव सुकृतम् । ता अब्रवीत् 'यथायतनं प्रविशते'ति ।

अग्निर्वाग् भूत्वा मुखं प्राविशत् । वायुः प्राणोभूत्वा नासिके प्राविशत् । आदित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशत् । दिशः श्रोत्रं भूत्वा कर्णौ प्राविशन् । ओषधिवनस्पतयो लोमानि भूत्वा त्वचं प्राविशन् । चन्द्रमा मनो भूत्वा हृदयं प्राविशत् । मृत्युरपानो भूत्वा नाभिं प्राविशत् । आपो रेतो भूत्वा शिश्नं प्राविशन् ।

तमशनायापिपासे अब्रूताम् । आवाभ्यामभिप्रजानीहीति । स ते अब्रवीत् । एतास्वेव वां देवतास्वाभजाम्येतासु भागिन्यौ करोमीति । तस्माद् यस्यै कस्यै च देवतायै हविर्गृह्यते भागिन्यावेवास्यामशनायापिपासे भवतः ।

卐 इत्यैतरेयोपनिषदि प्रथमाध्याये आत्मषट्के द्वि तीयः खण्डः ॥२॥ 卐

वे श्रीरामजी के संकल्प से सृष्ट ये सभी अग्नि प्रभृति देवगण

इस महान् संसार समुद्र में गिर गये तब लोकपालों सहित ब्रह्मा को परब्रह्म श्रीरामजी ने भूख तथा प्यास से श्लेषित करदिया तब भूख प्यास से पीडित वे सृष्टिकर्ता देव श्रीरामजी से वोले हे श्रीराम ? हमसवों के हेतु निवास स्थान प्रदान करें जहां पर प्रतिष्ठित होकर हमसव अन्न का भक्षण कर सकें ।

देवों की प्रार्थना सुनकर उन सभी के हेतु गौ की सृष्टिकर बता दी उसे देख देवों ने कहा यह हमसवों के लिये पर्याप्त नहीं है तब उन सभी देवों के हेतु अश्व की सृष्टि कर वता दी उसे देख सभों ने कहा हे देव ? यह भी हमसभों के लिये पर्याप्त नहीं है तब उन सभी देवों के लिये पुरुष की सृष्टि कर उहें बता दी पुरुष को देखकर सभी देवों ने कहा यह बहुत हर्ष का विषय है यह मनुष्यरूप अधिष्ठान अतिसुन्दर है यह पुरुष शरीर की सृष्टि परब्रह्म की निश्चय ही सुन्दर रचना है अनन्तर उन देवों से परब्रह्म ने कहा यथायोग्य अपने अपने आवास स्थानों में प्रवेश करो ।

सर्वेश्वर श्रीरामजी की आज्ञा प्राप्तकर अग्नि ने वाणी होकर मुख में प्रवेश किया । वायु ने प्राण होकर नाशिका छिद्रों में प्रवेश किया सूर्य ने चक्षु होकर आंखों में प्रवेश किया दिसाएं श्रोत्र होकर कानों में प्रवेश किये ओषधियां एवं वनस्पतियां लोम होकर त्वचा में प्रवेश किये चन्द्रमा मन होकर हृदय में प्रवेश किया मृत्यु अपान होकर नाभि में प्रवेश किया जल वीर्य होकर लिङ्ग में प्रवेश किया ।

अनन्तर सृष्टिकर्ता परब्रह्म श्रीरामजी से भूख एवं प्यास ने कहा हमदोनों के हेतु भी स्थान की व्यवस्था कर दें तब श्रीरामजी ने कहा तुम दोनों को इन सभी देवताओं में ही व्यवस्था कर देता हूँ । इन देवताओं में ही सहभागी के रूपमें नियत करता हूँ अतः जिस किसी भी देवता हेतु हवि का ग्रहण किया जाता है वह इनके ही भाग में भूख तथा प्यास के सहभागी होते हैं ॥२॥

ता लोकपालान् सृजानीति संकल्पगोचरा एता अग्निवायुप्रभृतयः सृष्टा उत्क्रमेण विरचिता देवता देवाः । लोकपाला इत्येतत् । अस्मिन् रागद्वेषकामक्रोधादिकलुषिते संसाररूपे महासमुद्रे प्रापतन् पतिताः । परमात्मज्ञानवैधुर्याद् देहादिष्वेवात्मभ्रमशालितया चैषां संसारपातिता जातेत्येतत् । स परमात्मा तं पिण्डं प्रथमतः समुत्पादितं हिरण्यगर्भमित्येतत् । अशनाया बुभुक्षा पिपासा जलादिपानेच्छा ताभ्यामन्ववार्जत् संयोजितवान् अशनायापिपासायुक्तं चकारेति । स्वकारणभूतस्य प्रथमोत्पन्नपिण्डस्याशनायापिपासा योगे जाते तदुत्पन्नानामग्न्यादीनां लोकपालानामपि ताभ्यां योगस्य जातत्वादशनायापिपासासंपीडिता एता देवता अग्न्यादयो लोकपाला एनं स्वकारणीभूतप्रथम पिण्डोत्पादकं पितामहं परमात्मानमब्रुवन्नपृच्छन्, नोऽस्माकं कृते आयतनं यत्र स्थित्वा भोगं करिष्यामः तादृशं स्थानं प्रजानीहि चिन्तय । कुरुष्वेत्यर्थः । यत्रायतने प्रतिष्ठिताः स्थितिं लभमाना वर्तमानाः सत्यो वयमन्नं बुभुक्षानिवर्तनक्षममदनीयमोदनादिकमदामो भक्षयाम इति ।

एवं देवताभिरुक्तः परमात्मा ताभ्योऽग्न्यादिदेव ताभ्यो गां गवाकृतिं पिण्डविशेषं पञ्चीकृतभूतभाग

विशेषं पूर्ववदुद्धृत्य संमूच्छर्य च आनयत् प्रदर्शितवानिदं वः स्थानमानीतमन्नादनार्थमित्यभिप्रायेण । ता देवता अब्रुवन् परमात्मानमवदन् । किमित्यत्राह-न नोऽयमलमिति । नोऽस्माकमन्नादनोपयुक्तोऽयं पिण्डो नास्ति गोरुपरि भागे दन्ताभावेनाधोदन्तमात्रेणान्नादनं सम्यक् कर्तुं न सम्भवति तस्मान्नायं पिण्डोऽलं समर्थः । समुपयुक्त इत्येतत् । एवं देवताभिरुक्तः परमेश्वरः ताभ्यो देवताभ्योऽश्वमश्वाकृतिपिण्डविशेषं पूर्ववन्निर्माय आनयत् प्रदर्शितवान् । अश्वाकृतिं पिण्डं दृष्ट्वा तस्याऽप्ययोग्यतां निश्चित्य अब्रुवन् परमात्मानं प्रति । किमित्याह-न वा इति । नोऽस्माकं कृतेऽयं पिण्डो नालं न समर्थः । उभयतो दन्तवत्वेऽपि विवेकविशेषरहितत्वेनाश्वाकृतिः पिण्डोऽपि नान्नादनसमुपयुक्त इत्येतत् । एवं प्रोक्तः परमेश्वरः ताभ्यो देवताभ्यः पुरुषं पुरुषाकृतिं पिण्डविशेषं पूर्ववत् पञ्चीकृतपञ्चभूतेभ्य एव स्वसंकल्पतो निर्माय संमूर्च्छ्य च आनयत् प्रदर्शितवानयं मनुष्याकृतिः पिण्डो वोऽन्नादनसमर्थो भवेदित्याशयेन । तं पिण्डमुभयतोदन्ततया विवेकविशेषवत्तया चान्नभक्षणे समुपयुक्तं पर्यालोच्य ता देवताः परमात्मानमब्रुवन् कथयामासुः । किमित्यत्राह-सुकृतं वतेति । वतेत्यव्ययं हर्षवाचकम् । सुकृतं सुष्ठु

कृतं शोभनमिदं पिण्डरूपं स्थानं कृतम् । शौष्ठ्वञ्चास्य पिण्डस्य स्वजनकप्रथमविशेषेणोपयुक्ततया च बोद्धव्यः । हर्षहेतुरीदृशपिण्डलाभ एव । पुरुषो वावसुकृतम् । पुरुषः पुरुषाकारः पिण्ड एव सुकृतं सुकृतसाधनत्वात् । सुकृतत्वं पिण्डस्योक्तं भवति सुकृतञ्च पुण्यकर्म । एवमुक्तः परमेश्वरः तासामिष्ट एष पिण्ड इति प्रतीत्य ता देवता अब्रवीदुक्तवान्-यथाऽऽयतनं प्रबिशतेति-आयतनमुत्पत्तिस्थानं तदनतिक्रम्य यथायतनं यथास्थानमत्र पिण्डे प्रवेशं कुरुतेति । यस्या देवताया यतः स्थानाद् गोलकरूपात् सकारणा या उत्पत्तिः सा देवता तदेव स्थानमाश्रयत्वस्मिन् पिण्डे अन्नभक्षणाय तत्र स्थित्वा चान्नादनपूर्वकमशनाया प्रशमं पिपासानिरासञ्च करोतु । गवाश्वसृष्टिः सकलतिर्यग्जातिसृष्ट्युपलक्षिका । अनेन व्यष्टिसृष्टिः प्रदर्शिता प्रथमपिण्डसृष्टिस्तु समष्टिसृष्टिरिति विवेकः ।

एवं यथायतनं प्रविशतेति परमात्मन आदेशं लब्ध्वा अग्निः वागाभिमानी देवो वाग् भूत्वा वाक् स्वरूपेण मुखं प्राविशत् । मुखमेवाग्नेः योनिरतस्तदेवास्याऽऽयतनं तस्मात्तदेवासौ प्रविष्टवान् स्वस्थानानतिक्रमणस्य परमेश्वराऽऽदेशान्तर्गतत्वात् । एवं घ्राणाभिमानी देवो वायुः घ्राणो भूत्वा घ्राणेन्द्रि-

यात्मकः सन् नासिके स्वयोनिभूते स्थाने प्राविशत् तत्र प्रवेशमकार्षीत् । आदित्यश्चक्षुरिन्द्रियाधिष्ठाता देवः चक्षुरात्मकः सन् अक्षिणी स्वयोनिभूते गोलके प्राविशत् तत्र स्थितिं चकार । दिशः श्रोत्राभिमानी देव इत्येतत् । श्रोत्रं भूत्वा श्रोत्रेन्द्रियात्मकः सन् कर्णौ श्रोत्रेन्द्रियस्थानमित्येतत् प्राविशत् । कर्णौ हि मूलमादित्यस्यापि तत एव श्रोत्रेन्द्रियद्वाराऽदित्यस्य समुद्भवात् । ओषधिवनस्पतय एतदभिमानी देव इत्येतत् । लोभानि भूत्वा लोमसहचरितत्वगिन्द्रियस्वरूपेण त्वचं त्वग् गोलकं स्वयोनिभूतं प्राविशन् । चन्द्रमा देवो योऽन्तःकरणाभिमानी स मनोभूत्वाऽन्तःकरणात्मना हृदयं हृत्कमलं स्वयोनिं प्राविशत् । मृत्युर्यमो देवः पाय्वभिमानी अपानो भूत्वा अपानसहचरितपाय्विन्द्रियरूपेण नाभिर्गुदामूलं सर्वप्राणबन्धनं स्वयोनिभूतं स्थानं प्राविशत् । आपोऽबभिमानी देवविशेष इत्येतत् । रेतो भूत्वा रेतःसहचरितोपस्थेन्द्रियात्मकः सन् शिश्नं प्रजननेन्द्रियस्थानं स्वयोनिभूतं प्राविशन् प्रविष्टा अभवन् ।

एवमग्न्यादिदेवतासु लब्धायतनासु आयतनरहिते अशनायापिपासेतमग्निप्रभृतिदेवताभ्योऽधिष्ठानदातारमीश्वरमब्रूतां कथितवत्यौ किमित्याकाङ्क्षायामाह-आ

वाभ्यामिति । आवाभ्यामशनायापिपासाभ्यां अभि प्रजानीहि विचिन्तय । स्थानमिति शेषः । यत्र स्थाने स्थिते भूत्वाऽऽवामपि देवतावदन्नमदावेत्येतादृशं स्थानं कुरुष्वेत्येतत् । एवं ताभ्यां प्रार्थितः स परमेश्वरः ते अशनायापिपासे प्रति अब्रवीदुक्तवान् । किमुक्तवा नित्याह-एतास्विति । एतासु अग्न्यादिषु देवतास्वेव वामशनायापिपासे आभजामि वृत्तिं प्रविभज्य अनु गृह्णामि । अनुग्रहप्रकारमेव दर्शयति भागिन्यौ करो मीति । एतासु देवतास्वेव भागिन्यौ भागवत्यौ करोमि इति । यस्या देवताया यो भागो यागादिषु हविरादि स्वरूपः तस्या देवतायाः तस्मिन्नेव भागे युवयोरपि भागः स्यादिति कल्पयामीत्यर्थः । ईश्वरेण सर्गकाले एव अशनायापिपासयोः कृते देवताभागेष्वेव भागः कल्पितस्तस्माद‌द्यत्वेऽपि यस्यै कस्यै च देवतायै यस्याः कस्याश्चिद् देवतायाः कृते हविर्हविरादिलक्षणो भागो गृह्यते उपह्रियते । दीयत इत्येतत् । याज्ञिकैरस्यां देवतायां भागिन्यौ एव अशनायापिपासे भवतः तद्देव ताभागेनैव भागवत्याविमेऽपि भवतः । अशनायापिपा सायुक्ताया एव देवताया भागग्राहित्वादनयोरपि भाग वत्त्वं तद्भागत एव सम्पाद्यते । अशनायापिपासयोः क्रियारूपत्वादिच्छारूपत्वाद्वाऽचेतनतया चेतनवस्तु

सम्पर्कमन्तरेण स्वयमन्नादनसामर्थ्याभावात् स्वातन्त्र्येण परमेश्वरेण आभ्यां देवतावद् भागो न कल्पितः किन्तु देवताभागेन भागवत्ता कल्पितेति ध्येयम् ॥२॥

卐 इति भगवद्रामानन्दाचार्यविरचिते ऐतरेयोपनिषद्भाष्ये प्रथमाध्याये आत्मषट्के द्वितीयः खण्डः ॥२॥ 卐

लोकपाल का सर्जन करुं एतादृश परमेश्वर संकल्प के विषय से सब अग्नि वायु प्रभृतिक देवता लोकपाल परमेश्वर से उत्पादित इस रागद्वेष काम क्रोधादि कलुषित संसाररूप महासमुद्र में गिर पडे अर्थात् परमात्म ज्ञान के अभाव होने से तथा देहादिक में आत्म भ्रमयुक्त होने से इन लोगों का संसार में पतन हुआ । उस परमात्मा ने उस पिण्ड को जो कि प्रथम उत्पादित हिरण्यगर्भरूप है उसे अशना बुभुक्षा पिपासायुक्त कर दिया। अग्नि प्रभृतिक देवों का कारण जो प्रथमोत्पन्न पिण्ड है उसे अशनापिपासा से सम्बन्ध होने पर तदुत्पन्न अग्नि प्रभृतिक लोकपाल को भी अशनपिपासा से सम्बन्ध हुआ तब अशनादिक से संपीडित ये अग्नि प्रभृतिक लोकपालों ने स्वकारण प्रथम पिण्ड के उत्पादक पितामह से पूछा । हमलोगों के लिये आयतन बतलाइये जहां रह करके हमलोग भोग कर सकें एतादृश स्थान को बतलाइये, जिस आयतन में रह करके

हमलोग बुभुक्षा के शामक अन्नादिक का भक्षण कर सके। इसप्रकार देवता से कथित परमात्मा ने उन अग्नि प्रभृतिक देवताओं को गवाकार पिण्ड विशेष पञ्चीकृतभूत भाग को ला करके बतलाया। यह तुम लोगों के अन्न के अदन का स्थान है। तब वे देवता परमात्मा से कहने लगे हमलोगों के लिये यह उपयुक्त नहीं है क्योंकि गायों को ऊपर भाग में दाँत नहीं होता है केवल नीचे के दाँतों से समीचीन रूपसे अन्न भक्षण नहीं हो सकता है अतः हमलोगों के लिये उपयुक्त नहीं है। जब देवों ने परमात्मा से कहा तब परमात्मा ने देवों के लिये अश्वाकार पिण्ड को बना करके देवताओं को बतलाया। तब इस पिण्ड में अन्न भक्षण की अयोग्यता का निश्चय करके पुनः परमात्मा से कहा कि यह पिण्ड भी भोजनादिक व्यवहार में युक्त नहीं है। यद्यपि अश्व पिण्ड उभय तो दाँत वाला है एतावता पूर्व पिण्डापेक्षया विशिष्ट है तथापि विवेक रहित होने से अश्व पिण्ड अन्न के भोजनादिक में समुपयुक्त नहीं है। इसके वाद परमेश्वर ने पुरुषाकार पिण्ड को स्वसंकल्प से बना करके उन देवताओं के लिये उपस्थित किया-यह पिण्ड आपलोगों के कार्य में अत्युपयोगी होगा? इस अभिप्राय से। इस मनुष्य पिण्ड के उभय तरफ दाँत वाले होने से तथा

विवेकवान् होने से अन्न भक्षणादि व्यवहार में अति समुपयोगी समझ करके वे देवगण परमात्मा से कहने लगे-**'सुकृतं वतेति'** यहां **'वत'** यह अव्यय शब्द हर्षवाचक है। आपने बहुत अच्छा इस स्थान को बनाया। इस पिण्ड में स्वजनक पिण्ड की समानाकारता होने से विवेक विशेषवान् होने से दोनों तरफ दाँत वाला होने से और अन्नादि भक्षणादि व्यवहार में अति विशेष उपयोगी होने से इस पिण्ड में पूर्वापेक्षया अत्यन्त शोभनत्व है। हर्ष का कारण एतादृश पिण्ड का लाभ ही है।

'पुरुषो वावेत्यादि' सुकृत के साधन होने से पुरुषाकार पिण्ड सुकृत है। इस पिण्ड में सुकृतत्व का कथन किया जाता है। सुकृत का अर्थ होता है पुण्य कर्म। देवगण के कथन से इनको यह पिण्ड अभिलषित है ऐसा जान करके भगवान् ने उन देवों से कहा-**'यथा आयतनमित्यादि'** आपलोग यथा स्थान इस पिंण्ड में प्रवेश करें। जिस देवता की जिस गोलकरूप स्थान से करण के साथ उत्पत्ति हुई है। वे देवगण उसी स्थान को आश्रित करके इस पिण्ड में अन्न भक्षणादि व्यवहार के लिये उसमें स्थित हो करके अन्नादि के भक्षणादि पूर्वक अशना पिपासा का निराकरण करें। गवाश्व की

सृष्टि सकल तिर्यक् जाति का उपलक्षक हैं। इससे व्यष्टि अर्थात् प्रातिस्विक सर्ग का प्रदर्शन किया है। प्रथम पिण्ड सृष्टि समष्टि सृष्टि है।

यथा आयतन प्रवेश करें एतादृश परमात्मा के आदेश को प्राप्त करके वागाभिमानी अग्निदेव वाक् रूप हो करके अर्थात् वाक् स्वरूप हो करके मुख में प्रविष्ट हो गये। मुख ही तो अग्नि का निदान स्थान है अतः अग्नि का आयतन मुख है इसलिये मुख में ही अग्नि ने प्रवेश किया क्योंकि स्वकीय स्थान का अतिक्रमण मत करो ऐसा परमेश्वर का आदेश है परमेश्वर की आज्ञा का अतिक्रमण करने की शक्ति किसी में भी नहीं है। इसी तरह घ्राण के अभिमानी वायुदेव ने घ्राण स्वरूप हो करके स्वयोनिभूत नासिकारूप स्थान में प्रवेश किया। चक्षुरिन्द्रिय के अधिष्ठाता आदित्य देव ने चक्षुः स्वरूप हो करके स्वयोनिभूत अक्षिरूप गोलक में प्रवेश किया अर्थात् उस गोलक में अपना निवास किया। श्रोत्र के अभिमानी दिशा देव ने श्रोत्रेन्द्रिय स्वरूप हो करके कान में प्रवेश किया। कर्णदिग् देव का मूल है इसलिये श्रोत्रेन्द्रिय द्वारा दिग् देव का समुद्भव हुआ है। ओषधि वनस्पति के अभिमानी देव ने लोमसहचरित त्वगिन्द्रिय स्वरूप हो करके स्वयोनिरूप त्वक् गोलक में प्रवेश

किया । अन्तःकरण मनके अभिमानी चन्द्रमा देव ने अन्तःकरण मनरूप हो करके स्वयोनिभूत हृदयकमलरूप गोलक में प्रवेश किया । एवं पायु के अभिमानी मृत्यु यमदेव ने अपानरूप हो करके अर्थात् अपान् सहचरित पायु इन्द्रियरूप हो करके नाभि गुदामूल में जो कि स्वकीय योनिभूत स्थान में प्रवेश किया । एवं जलाभिमानी देवविशेष ने रेतः सहचरित उपस्थ इन्द्रिय स्वरूप हो करके शिश्नः स्वयोनिभूत प्रजननेन्द्रिय स्थान में प्रवेश किया ।

इस तरह जब अग्नि प्रभृतिक देवलोगों ने अपने अपने आयतन को प्राप्त किया तब आयतन रहित अशना पिपासा भी अग्नि प्रभृति देवों को आयतन देनेवाले परमात्मा से निवेदन करने लगी । उन अशनापिपासा ने परमेश्वर से क्या कहा ? इस ज़िज्ञासा के उत्तर में कहते हैं-**'आवाभ्यामित्यादि'** हम अशनापिपासा के लिये स्थान का चिन्तन करें । जिस स्थान में स्थित हो करके अग्न्यादि देव के समान हम दोनों भी अन्नादि भक्षण व्यवहार कर सकें एतादृश स्थान का अन्वेषण कीजिए । इसप्रकार अशनापिपासा से प्रार्थित परमेश्वर ने उन दोनों अशनापिपासा से कहा । क्या कहा ? इस जिज्ञासा के उत्तर में कहते हैं-**'एतासु'** इत्यादि । इन अग्नि प्रभृति

देवों में ही मैं आप दोनों को वृत्ति का विभाग करके अनुगृहीत करता हूँ। अनुग्रह प्रकार को बतलाते हैं- '**भागिन्यौ**' इत्यादि। इन अग्नि प्रभृति देवों में तुम दोनों को भागवती बनाता हूँ, अर्थात् जिस देव का जो भाग यागादिक में है हविरादिरूप उस देवता के उस भाग में तुम दोनों के भाग की कल्पना मैं करता हूँ। जिसलिये परमेश्वर ने सर्गकाल में अशनापिपासा के लिये देवताओं के भाग में ही इनके भाग की कल्पना की। इसलिये आज भी जिस किसी देवता के लिये जो भाग दिया जाता है याज्ञिकों से इन देवताओं के भाग में से ही ये अशनापिपासा भी भागवती होती हैं। अशना पिपासा से युक्त हो करके ही देवगण स्वकीय भाग का ग्रहण करते हैं तो उस भाग से ही ये लोग अशना पिसासा भी भागवती होती हैं।

प्रश्न-परमेश्वर ने जिसप्रकार से अग्नि प्रभृति देवों के लिये भाग की कल्पना की उसी तरह इन अशना पिपासा के लिये भाग की कल्पना क्यों नहीं की? इससे तो परमेश्वर में समता दृष्टि का बाध होता है पक्ष पातित्व की आपत्ति भी होती है।

उत्तर-अशनापिपासा ये दोनों क्रियारूप अथवा इच्छारूप हैं अतः ये उभयथापि अचेतन हैं अतः चेतन

के संपर्क के बिना स्वयम् इनमें अन्नभक्षणादि करने में सामर्थ्य नहीं है किन्तु चेतन के संपर्क से ही यथा कथञ्चित् अन्नभक्षणादिक में समर्थ हो सकेंगे इसलिये परमेश्वर ने स्वतन्त्ररूप से इनके लिये भाग की कल्पना न करके देवता के भाग से इनको भागवान् बनाने का प्रयास किया ॥२॥

❀ श्रीमदानन्दभाष्यप्रकाशे द्वितीयः खण्डः ❀

卐 अथ तृतीयः खण्डः 卐

स ईक्षत । इमे नु लोकाश्च लोकपालाश्च । अन्नमेभ्यः सृजा इति । सोऽपोऽभ्यतपत् । ताभ्योऽभितप्ताभ्यो मूर्तिरजायत । या वै सा मूर्तिरजायतान्नं वैतत् ।

तदेतदभिसृष्टं सत् पराङ्त्यजिघांसत् । तद् वाचाऽजिघृक्षत् । तन्नाऽशक्नोद् वाचा ग्रहीतुम् । स यद्धैनद् वाचाऽग्रहैष्यत् । अभिव्याहृत्य हैवान्नमत्रप्स्यत् । तत् प्राणेनाऽजिघृक्षत् । तन्नाशक्नोत् प्राणेन ग्रहीतुम् । स यद्धैनत् प्राणेनाग्रहैष्यत् । अभिप्राणय हैवान्नमत्रप्स्यत् ।

तच्चक्षुषाऽजिघृक्षत् । तन्नाशक्नोच् चक्षुषा ग्रहीतुम् । स यद्धैनच्चक्षुषाऽग्रहैष्यत् । दृष्ट्वा हैवान्नमत्रप्स्यत् । तच्छ्रोत्रेणाजिघृक्षत् । तन्ना शक्नोच्छ्रोत्रेण ग्रहीतुम् । स यद्धैनच्छ्रोत्रेणाग्रहैष्यत् । श्रुत्वा हैवान्नामत्रप्स्यत् । तत्त्वचाऽग्रहैष्यत् स्पृष्ट्वाहैवान्नमत्रप्स्यत् । तन्मनसाऽजिघृक्षत् । तन्नाऽक्नोन्मनसा ग्रहीतुम् । स यद्धैनन्मनसाऽग्रहैष्यत् । ध्यात्वा हैवान्नमत्रप्स्यत् । तच्छिश्नेनाऽजिघृक्षत् । तन्नाशक्नोच्छिश्नेन ग्रहीतुम् । स यद्धैनच्छिश्नेनाऽग्रहैष्यत् । विसृज्य हैवान्नमत्रप्स्यत । तदपानेनाऽजिघृक्षत् । तदावयत् । स एषोऽन्नस्य ग्रहो यद्वायुः । अन्नायुर्वा एष यद्वायुः ।

स ईक्षत कथन्विदं मदृते स्यादिति । स ईक्षत कतरेण प्रपाद्या इति । स ईक्षत यदि वाचाऽभिव्याहृतं, यदि प्राणेनाभिप्राणितम्, यदि चक्षुषा दृष्टम्, यदि श्रोत्रेण श्रुतम्, यदि

त्वचा स्पृष्टम्, यदि मनसा ध्यातम्, यद्यपाने नाऽभ्यपानितम्, यदि शिश्नेन विसृष्टम्, अथ कोऽहमिति ।

स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत । सैषाविदृतिर्नाम द्वास्तदेतन्नान्दनम् । तस्य त्रय आवसथाः त्रयः स्वप्नाः । अयमावसथोऽयमावसथोऽयमवासथ इति ।

स जातो भूतान्यभिव्यैख्यत् । किमिहान्यं वावदिषदिति । स एतमेव पुरुषं ब्रह्मततमपश्यदिदमदर्शमिती ३ । तस्मादिदन्द्रो नाम । इदन्द्रो ह वै नाम । तमिदन्द्रं सन्तमिन्द्रमित्याचक्षते परोक्षेण । परोक्षप्रिया इव हि देवाः । परोक्षप्रिया इव हि देवाः ॥३॥

॥ इत्यैतरेयोपनिषदि तृतीयः खण्डः ॥३॥ ॥

सृष्टिकर्ता श्रीरामजी ने विचार किया कि इन सवलोक एवं लोकपालों की रचना की अव इन लोकपालों के हेतु अन्न की रचना करुं उस परब्रह्म ने जलों को लक्ष्यकर खूव तप-विचार किया अभितप्त उन जल से मूर्ति प्रकट हुई वह जो मूर्ति प्रकट हुई वह अन्न ही है ।

लोकपालों के हेतु उत्पन्न वह मूर्त अन्न परांमुख होकर भागने लगा तब उस अन्न को परपुरुष ने वाणी से ग्रहण की चेष्टा की पर उस अन्न को वाणी द्वारा ग्रहण करने में समर्थ नहीं हुआ यदि वाणी से अन्न को ग्रहण करलेता हो मनुष्य अन्न का नाम लेकर ही तृप्त हो जाता। अनन्तर प्राण-घ्राणेन्द्रिय से ग्रहण की चेष्टा की पर ग्रहण नहीं कर सका, यदि उस अन्न को घ्राण द्वारा ग्रहण करलेता तो अब भी मानव अन्न को सूंघकर ही तृप्त हो जाता। तब नेत्र द्वारा ग्रहण की चेष्टा की पर नेत्र से ग्रहण नहीं कर सका यदि वह अन्न को नेत्र से ग्रहण में समर्थ होता तो अन्न को देखकर तृप्ति का अनुभव होता। अनन्तर उस अन्न को श्रोत्र इन्द्रिय से ग्रहण का प्रयत्न किया श्रोत्र द्वारा ग्रहण नहीं करसका यदि उस अन्न को श्रोत्र द्वारा ग्रहण करलेता तो मानव सुनकर ही अन्न से तृप्त हो जाता। वाद में त्वक् इन्द्रिय से उस अन्न का ग्रहण हेतु प्रयत्न किया पर त्वचा से ग्रहण नहीं कर सका यदि त्वचा से ग्रहण करलिया होता तो आज का मानव अन्न का स्पर्श करके ही तृप्त हो जाता। अनन्तर मनसे उस अन्न का ग्रहणार्थ प्रयत्न किया परन्तु मनसे उसका ग्रहण नहीं कर सका यदि मनसे अन्न का ग्रहण करलिया होता तो अन्न के ध्यान से ही मानव तृप्त हो जाता। वाद में अन्न को उपस्थ इन्द्रिय से ग्रहण का प्रयत्न किया पर उपस्थ से अन्न का ग्रहण नहीं कर सका यदि उपस्थ से ग्रहण करलेता तो मानव त्याग करके तृप्ति का अनुभव करलेता। अनन्तर उस अन्न को अपान वायु द्वारा ग्रहण करने की इच्छा की तो उस अन्न को ग्रहण करलिया यह जो अपान वायु है वह अन्न का ग्रहण करने वाला है यही अपान वायु ही अन्न द्वारा जीवन धारक है।

यह मुझसे रहित कैसे रह पायेगा इसप्रकार सृष्टिकर्ता परब्रह्म ने विचार किया मैं किस मार्ग से इस मानव शरीर में प्रवेश करुं इसप्रकार उस परब्रह्म ने विचार किया यदि वह पुरुष वाणी द्वारा

बोला यदि प्राण से सूंघा एवं नेत्र से देखा और श्रोत्र से सुना तथा त्वचा से स्पर्श किया तथैव मनसे मनन किया और अपान वायु द्वारा अन्न का भक्षण किया तथा उपस्थ से मूत्र एवं वीर्य का त्याग किया तो अव मैं कौन हूँ इसप्रकार से परब्रह्मने विचार किया ।

वह सर्गकर्ता श्रीरामजी ने मानव शरीर के मस्तक को विदीर्ण कर उसी ब्रह्मरन्ध्र मार्ग से मानव देह में प्रवेश किया उस ब्रह्मरन्ध्र द्वार का नाम विहृति है एवं वह आनन्द प्रदायक है उस परपुरुष के तीन आवांश स्थान हैं तथा तीन स्वप्न स्थान हैं । यह हृदयगुहा प्रथम आवास स्थान है तथा श्रीसाकेत दिव्यधाम द्वितीय आवास स्थान है और यह समस्त ब्रह्माण्ड तृतीय आवास स्थान है ।

मानव के रूपमें उत्पन्न उस पुरुष ने सभी भूतों को अच्छी प्रकार से देखा एवं इस देह में अन्य कौन है इसप्रकार कहा तब उस मानव देह धारक पुरुष ने इस अन्तर्यामी परपुरुष श्रीरामजी को ही सर्वव्यापक ब्रह्म के रूप में देखा एवं कहा परम सौभाग्य है कि मैंने सर्वेश्वर श्रीरामजी का दर्शन किया ।

अतः सर्वेश्वर श्रीरामजी का नाम इदन्द्र है इदन्द्र नामवाले श्रीरामजी हैं तो भी परोक्ष रूपसे इन्द्र ऐसा तत्त्वज्ञानीजन कहते हैं क्योंकि देववर्ग परोक्ष प्रिय होते हैं ।।३।।

स परमेश्वर ईक्षत संकल्पमकरोत् । इमे नु लोका अम्भःप्रभृतयो लोकपाला अग्निप्रभृतयः सृष्टाः । अशनायापिपासाभ्यां योजिताश्च । एभ्यः स्थानान्यपि दत्तानि स्वाभीष्टान्युपभोगोपयुक्तानि परन्तु अदनीयस्यैव चेदन्नस्याभावः स्यात् तदा कथमेषां लोकपालानां बुभुक्षापिपासाव्याकुलितानामवस्थितिः संभवेत्

तस्मात् एभ्यो लोकपालेभ्यो लोकपालार्थमन्नं सृजै सृजानि । समुत्पादयेयमित्येतत् । एवं संकल्पं स कृतवानित्यर्थः । एवं संकल्प्य सः परमात्मा अपोऽभ्य तपदप उद्दिश्य अभिध्यातवान् ।अप्पदं पञ्चीकृतभूतोप लक्षणमित्युक्तम् । ब्रीहियवादिकमन्नं पञ्चीकृतेभ्य एभ्योभूतेभ्यः समुत्पन्नं भवत्विति संकल्पगोचरा अपः कृताः कृतवानित्येतत् । अभितप्ताभ्यो ब्रीहियवाद्य न्नोत्पादगोचरसंकल्पविषयाभ्य एताभ्योऽद्भ्यो मूर्तिर जायत घनीभूतं शरीरधारणसमर्थं ब्रीह्यादिकमजायत । मूर्तिशब्दार्थं व्याचष्टे श्रूतिरेव-या वै सेति । या वै मूर्तिः चराचररूपा तदन्नमिति । घासादिकमचरमूर्तिर्वि डालव्याघ्रादिखाद्यभूता मूर्तिर्मूषकहरिणादिरूपा चरस्व रूपेति विवेकः ।

तदेतदन्नं परमात्मना बुभुक्षाशान्त्यर्थं लोकपालानां कृते संकल्प्यविशेषतः समुत्पादितं सदिमे लोकपाला मां भक्षयिष्यन्तीति मत्त्वापराङ् पराङ्मुखं सदतिलो कपालानतिक्रम्य अजिघांसद् गन्तुमियेष । पलायनं कर्तुमैच्छदित्येतत् । नन्वचेतनं ब्रीह्यादि कथं लोकपा लानां जिघत्सामवेदीत् कथञ्च तत्पूर्वकं पलायनं कर्तुमैच्छत् । न न ब्रीह्यादिमात्रमन्नं सृष्टवान् विभुः किन्तु मूषकाद्यपि विडलादिभोग्यं सृष्टवान् तच्च चेत

नावत्संपृक्तम् । संभवति च तस्मिन् जिघत्सापरिज्ञानं पलायनेच्छा च, तदारोप्य ब्रीह्यादिष्वपि व्यवहारः समुपपद्यत एव । आप ऐक्षन्तेत्यादि व्यवहारश्च श्रुति प्रसिद्धोऽस्त्येव । तद् वाचेति । तत् पलायनपरमन्नं लोकलोकपालकार्यकारणसंघातरूपः प्रथमोत्पन्नः पिण्डो हिरण्यगर्भात्मको वाचा वाग्व्यापारेण ग्रहीतुमा दातुन्नाशक्नोन्न समर्थोऽभवत् । ननु वाचाऽन्नग्रहण प्रयत्न एवानुपपन्नो न कोऽपि प्राणी निकृष्टतरोऽपि पक्ष्यादिर्वाचा ग्रहीतुं यतमानो दृश्यते । प्रथमजश्च पिण्डः समष्टिसर्गो व्यष्टिसर्गापेक्षयाऽत्यन्तमुत्कृष्टः कथमेवमघटमानं कर्तुमघटिष्टेतिचेत्सत्यम् । सर्गाद्य काल एष उत्पन्नमात्रोशिक्षितोऽन्नभक्षणं तदनुभवरहितः प्रथमजोऽपि कथङ्कारमद्यतनरीत्यैव ग्रहीतुं प्रवर्तता मन्नग्रहणरीतिपरिचयायैव सोऽयोग्ययाऽपिरीत्या प्रय स्यति चरमपर्याये च सा रीतिरनेन परिचिता लोकलो कपालेषु प्रसरन्ती संप्रत्यपि प्रवर्तमाना दृश्यत इति । स प्रथमजः पिण्ड एनदन्नं वाचा वाग्व्यापारेण अग्रहैष्यद् गृहीतवान् स्यात् तर्हि तत्कार्यभूतः सर्वोऽपि प्राणी अन्नमभिव्याहृत्य वाचा अन्नमिदमिति व्यवहृत्य अत्रप्स्यत् तृप्तिमगमिष्यत् । न च अन्नमभिव्याहृत्य कश्चित् तृप्तः परिदृश्यते तस्माद्वाचा ग्रहीतुन्न प्राऽभवत्

प्रथमः पिण्ड इति भावार्थः । ततः स घ्राणेन घ्राणेन्द्रियव्यापारेण ग्रहीतुमिच्छत् परन्तु तेन ग्रहीतुन्न प्रभुर्बभूव । यदि घ्राणव्यापारेण स गृहीतवान् स्यात् तदा तदुत्पन्नः सर्वोऽपि प्राणी अन्नमाघ्रायैव तृप्तिं गच्छेन्न च तथा भवतीति द्वितीयपर्यायार्थः । स प्रथमजः पिण्डश्चक्षुर्व्यापारेणान्नमादातुं प्रायतत तदाऽपि नादातुं समर्थोऽभवद् यदि चक्षुषा स ग्रहीतुं शक्तोऽभविष्यत् तदा तेनैव शिक्षितः समस्तो लोकोऽन्नं चक्षुसादृष्ट्वैव तृप्तोऽभविष्यत् न चैवं भवति । ततः श्रोत्रेन्द्रियव्यापारेणाऽपि यत्नं कृतवान् सोऽन्नग्रहणाय तथापि न समर्थोऽभवत् । श्रोत्रव्यापारेण प्रथमजो यदि गृहीतवान् स्यादन्नं तदा श्रुत्वैवान्न मितरोऽपि तृप्यन् दृश्येत न तथा दृश्यते । ततः स वागिन्द्रियव्यापारेणान्नं समादातुं प्रयासमाचरत् । सोऽपि प्रयासोऽस्य निष्फल एव जातो यदि तथाऽयं सफलोऽभविष्यत् । तदाऽद्यत्वेऽपि स्पृष्ट्वैवान्नं तृप्येन्न च तृप्यति स्पृष्ट्वाऽन्नम् । ततो मनोव्यापारेण मननात्मनाऽऽदातुं प्रायतिष्ट न चाप्राऽभवदादातुं यदि प्राऽभविष्यदादातुं मननेन तदाऽधुनापि लोको मनन मात्रं कृत्वैवान्नस्य तृप्तिमुपेयात् । न चान्नमननमात्रेण कस्यचित् तृप्तिर्दृष्टचरीतिभावः । ततः स शिश्नव्या पारेण परित्यागात्मनाऽपि ग्रहीतुमन्नं

प्रायतत न चाय मपि यत्नोऽस्य फलेग्रहिरभवत् । यदि तथाऽभविष्य दधुनातनोऽपि लोकः तथैवान्नमत्तुं प्राभविष्यत् तृप्तः स्यान्न च तथा दृश्यते । तदनन्तरमपानेन मुखच्छिद्रगत वायुनाऽधोगमनशीलेन्नान्नं ग्रहीतुं व्यापारपरः प्रथम जोऽभूत् तदा स तदन्नमावयदग्रहीष्ट । भक्षितवानित्येतत् । इत्थं प्रयस्यता प्रथमजेन चरमे पर्याये समुचिता रीतिः परिचिताऽतोऽद्यत्वेऽपि लोका मुखच्छिद्रगतवायु नैवापानाख्येनान्नमदन्ति तृप्ताश्च भवन्ति । एतमर्थं द्रढ यितुमेवाह-स एष इति । यद् वायुर्योऽयमपानाख्यो वायुर्मुखरन्ध्रगतः स एषोऽन्नस्य ग्रहो ग्राहकः । अ पानवायुरेवान्नस्यादानकर्त्तेत्यर्थः । अतएव अपानवायो रन्नजीवनकत्वं कथयति योग्यं वायुरपानाख्यः सोऽन्ना युरन्नमेवायुर्जीवनं यस्य तादृशः । यदन्नमुपलभ्यते तस्मादेवापानाख्यः प्राणः तिष्ठति अन्नाभावे तत्स्थितिर्न शक्यसंभवाऽतोऽपानस्य जीवनसाधनमन्नमित्येतत् ।

स परमात्मा लोकलोकपालसर्गं विधाय तज्जीवनोपायमन्नञ्च विरच्यापि लोकपालाधिष्ठितमपीदं कार्यकरणसंघातलक्षणं पुरं मदृते मां विना कथं स्याद् यथा पुरं पौरैरधिष्ठितमपि पुरस्वामिनं विना न चिरं स्थितयेऽवकल्पते तथैव नवद्वारमेतत्पुरमिवास्थितं

शरीरं पुरस्वामी तत्र यथाऽवतिष्ठते तथाऽहमप्यनुप्रविश्यात्रावस्थितो भवामीत्यावश्यकमन्यथाऽस्य चिरकालीनः स्थेमा नार्हति भवितुमितीक्षत पर्यालोचितवान् । एतेन कार्यकरणसंघातपरिपालनात्मकं स्वप्रवेशप्रयोजनं प्रदर्शितं भवति । एवंस्वप्रवेशप्रयोजनमेकं पर्यालोच्य वक्ष्यमाणं प्रयोजनान्तरमुपेक्ष्य पूर्वं प्रवेशमार्गं चिन्तयति-स इक्षतेति । स परमात्मा परिपालनं कार्यकरणसंघातस्य मदृते न संभवतीति पर्यालोचनान्तरमीक्षत चिन्तितवान् । किमित्याकाङ्क्षायामाह-कतरेणेति । किंशब्दाड्डुतरच् प्रत्ययो द्वयोः संदिग्धयोर्मध्ये एकस्य निर्णये कार्येऽनुशिष्टः तस्मादिह द्वौ मार्गौ चिन्तनीयौ । तौ द्वौ पादाग्रं ब्रह्मरन्ध्रञ्चेति । अनयोः पादाग्रब्रह्मरन्ध्रयोः केन मार्गेण प्रवेष्टव्यमिति विचारितवान् । यद्वा नव वै पुरुषे प्राणाः सप्त वै शीर्षण्याः प्राणा द्वावाञ्चौ इत्यादिश्रुत्या 'नवद्वारे पुरे देही'ति भगवद्गीतोक्तेश्चास्य कार्यकरणसंघातरूपस्य कलेवरस्य नवद्वारतया तेषु केन द्वारेण प्रवेष्टव्यमिति चिन्तितवान् । अन्नपक्षे क्तरेणेत्यत्र छान्दसो डतरच् लोके डत्तमच् एव बहूनामेकस्य निर्धारणेऽनुशासनात् । एवं प्रवेशद्वारं परिचिन्त्य द्वितीयं प्रवेशप्रयोजनं चिन्तयतीति श्रुतिराह-स इत्यादिना स परमात्मा मार्गचिन्ता

नन्तरमीक्षत पर्यालोचयत् । किमित्यत्राह-यदीत्यादि । वाचाऽभिव्याहृतम् । मां विना केवलया वाचा वागिन्द्रियेणैव अभिव्याहाररूपं स्वकार्ये सम्पादितम् । प्रायेण घ्राणेन्द्रियेणैव केवलेन मां विना अनुप्राणितं समाघ्राणरूपं स्वकार्यं कृतम् । श्रोत्रेण च स्वकार्यं श्रवणरूपं त्वचा त्वगिन्द्रियेण स्वकार्यं स्पार्शनप्रत्यक्षरूपं मनसा ध्यानरूपमपानेन पाय्विन्द्रियसहचरितेन अभ्यपानितमोदनाद्यदनीयं वस्तु शरीरान्तर्गतं कृतम् । भक्षितमित्येतत् । तदा अहं कः स्याम् ? कस्याहं स्वामी भवेयम् ? यथा पुरस्वामिनं विनैव पौरा यदि पुरकार्यं विदध्युः तदा पुरस्वामी न कोऽपि भवति तथा मां विना प्राणादिभिः स्वस्वकार्यं यदि क्रियेत तदा न कोऽपि भवेयं नाहं पुरस्वामी स्यां नाहमस्य शेषी स्यां न चेदं शरीरं तदन्तर्गतानि करणानि तदधिष्ठातारो वा देवा वा मम शेषभूताः स्युः तथा च सर्वशेषिणं सर्वस्वामिनं सन्तमपि मां कोऽप्यवगच्छेदयं मम स्वामी शेषी नियन्ता यदधीनोऽहमत एतदवगमायाऽपि मयात्र सर्वशेषिणा स्वशरीरभूतजीवद्वाराऽनुप्रवेष्टव्यमिति पर्यालोचयदित्यर्थः । एतेन द्वितीयं स्वप्रवेशप्रयोजनं चिन्तितं फलितं भवति ।

पूर्वं प्रदर्शितेषु मार्गेषु पादाग्ररूपो मार्गः प्राण

वायुप्रवेशमार्गः । मुखादिरूपा मार्गास्तु वागिन्द्रियादिप्रवेशोपयोगिनः । प्राणवागादयः सर्वे एव परमात्मनः प्रेष्यवर्गान्तर्गताः । तस्मात् पुरस्वामी यथा भृत्यप्रवेशमार्गेण प्रवेशमनुचितं मन्यते तथैव परमात्माऽपि स्वप्रेष्यप्रवेशोपयुक्तमार्गेषु न केनापि स्वप्रवेशमुचितममन्यत । परिशिष्ट एको मार्गो ब्रह्मरन्ध्रात्मको नानेन तदीयप्रेष्येषु कश्चिदपि प्रवेशं लभते पौर इव पुरस्वामिप्रवेशमार्गेण । इत्थं ब्रह्मरन्ध्रेणैव स्वप्रवेशमवधार्य स परमात्मा एतमेव मूर्धमध्यगतमेव सीमानं कपालद्वयसन्धिरूपं विदार्य पृथक् कृत्य । दलद्वयं विभज्येत्येतत् । एतया छिद्ररूपया द्वारा मार्गेण प्रापद्यत प्रविष्टवान् । अत्र कार्यकरणसंघातात्मके शरीर इत्येतत् । परमात्मनः प्रवेशो जीवद्वारक एव । अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति श्रुत्यन्तरे जीवशरीरकस्यैव परमात्मनोऽनुप्रवेशावगमात् । अस्य मार्गस्य संज्ञां गुणञ्चनिर्दिशति-सैषेति । सेयं श्रुत्यन्तरेष्वपि प्रसिद्धा द्वारं विदृतिर्नाम विदृतिरिति संज्ञा तस्या द्वारमित्यर्थः । विदारणेन सम्पादितत्वादस्य मार्गस्य विदृतिरिति नाम जातम् । तदेतद् द्वारं नान्दनं द्वारमुच्यते । नन्दत्यनेनेति नन्दनं तदेव नान्दनम् । अनेनैव मार्गेण गतः परमात्मोपासको मोक्षस्थानमधिरो

इति आनन्दमयं परमात्मानं प्राप्नोति ततश्च नन्दति परमात्मस्वरूपभूतं परमानन्दमनुभवति च तस्मादानन्दानुभवसाधनमेतन्नान्दनमित्युच्यते । यद्वा इदमपि नामान्तरमेव तस्य द्वारस्य मन्तव्यम् । मुखादिमार्गस्य नानन्दहेतुत्वं तद्वारेण निर्गतस्य मोक्षस्थानप्राप्त्यकथनात् । अस्य तु तयोर्ध्वमायन्नमृतत्वमेतीति श्रुतेरमृतत्वोपायत्वावगमान्नान्दनमिति व्यपदेशो युक्तो न मुखादीनामितिभावः । ननु जीवशरीरकः परमात्मा शरीरमनुप्रविशतीत्यवगतं परन्तु शरीरे प्रविश्य स कुत्र शरीर भागे तिष्ठतीति वक्तव्यमाकांक्षिततत्वात् । अत्राह-तस्येति । तस्य जीवेनात्मनाऽनुप्रविष्टस्य परमात्मनः त्रयः त्रिसंख्याका आवसथा निवासस्थानान्यस्मिन् शरीरे भवन्ति कदाचिद् दक्षिणमक्षि, कदाचित् कण्ठः कदाचिद् हृत्कमलकर्णिकाग्रभाग इति जाग्रत्स्वप्नसुषुप्ति दशा जीवेषु भवन्ति तन्निर्वाहकः तत्तच्छरीरवेषेण तत्र तत्र स्थाने स्थितोऽयं भवति । स्वप्नाः स्वप्नसदृशाः त्रयः स्वप्नाः पृथग्भूतानाश्चर्यकरान् पदार्थान् दर्शयन्ति तथा त्रिविधा अस्यावसथा आश्चर्यकरा इत्येतत् । जाग्रत्स्वप्नसुषुप्तिभेदेन त्रिविधान्यपि निवासस्थानान्यस्य स्वप्नवदाश्चर्यकारीणि भवन्तीत्येतत् । आवसथानेव प्रसिद्धवन्निर्दिशति-अयमावसथ इति । यथा राजा

तत्तत्स्थानेषु स्थित्वा राज्यशासनं श्रौतस्मार्तक्रिया अन्तःपुरवर्गरञ्जनं च कुरुते तथा प्रविष्टो जीवशरीरकः परमात्माऽपि जाग्रदाद्यवस्थासु अक्ष्यादिस्थानगतो जीवस्य तत्तन्निर्वाहहेतुर्भवतीतिभावः ।

स परमात्मा जातो जीवेनात्मना शरीरमनुप्रविष्टः सन् भूतानि पञ्चीकृतानि पृथिव्यादीनि अभिव्याख्यत् नामरूपाणि व्याकरोत् । जीवशरीरकोऽनुप्रविश्य नाम रूपव्याकरणं कृतवानित्यर्थः । इह प्रपञ्चे समग्रे मदनुप्रवेशविशिष्टे । अन्यं वा अन्यमिव किमवदिषदवदिष्यत् । शरीरशरीरिभावेन सर्वत्राहं स्थितोऽस्मि तेन सर्वः प्रपञ्चो मदात्मक एव तदा क एवं शब्दोऽस्ति यो मदन्यमिव प्रपञ्चं वक्तुमिच्छेत् शक्नुयादित्येतत् । वा शब्द इवार्थे । अवदिषदिति छान्दसं रूपम् सर्वेष्वचेतनेषु भूतेषु प्रकारतामापन्नेषु प्रकारितयाऽवस्थितोऽहमेव नान्य इति निश्चितवान् । एवमचेतनेषु प्रकारितयाऽवस्थितं स्वमेव चेतनेष्वपि प्रकारितयाऽवस्थितं स्वमेवापश्यत् सर्वसृष्टिकर्त्तेतिदर्शयति-स एतमेवेति । स परमात्मा एतमेव सर्गकर्तृतया प्रकृतं पुरुषं स्वात्मानमित्येतत् । ततं तं व्याप्तम् । चेतनाचेतनेषु सर्वेषु प्रकारितया वर्तमानत्वादतिशयेन व्याप्तमित्येतत् । ब्रह्मस्वरूपतो गुणतश्च निरतिशयवृहदपश्यद् दृष्टवान् ।

सर्वत्र व्याप्तब्रह्मत्वेन स्वात्मानमेवापश्यदित्यर्थः । तत ममित्यत्र एकस्य तकारस्य छान्दसो लोपः । तततम मिति पदाकारः । तनोतेश्च विस्तारार्थस्य व्याप्तिरर्थः । तेन व्याप्ततममित्यर्थः फलति । व्याप्ततमं ब्रह्मापश्य दित्युक्तम् । तत्र दर्शनाकारमेवाभिलपति 'इदमदर्श मि'ति । इदं व्याप्ततमं स्वस्वरूपं ब्रह्म वृहत्तमं वस्तु अहमदर्शं दृष्टवानस्मि इति तदर्थ । इतिशब्द इदम दर्शमित्यस्य दर्शनस्य स्वरूपनिर्देशकः । तत्र प्लुतत्व विधानं हर्षसूचकम् । सर्वत्र स्वात्मदर्शनस्य हर्षहेतुत्व म् । एवं चेतनाऽचेतनप्रकारिभूतं स्वस्वरूपदर्शनमभि धाय सर्वत्र इदन्तया स्वद्रष्टृत्वनिमित्तकं नाम निर्वचनं कुरुते-तस्मादिति । यस्मादिदन्तया स्वात्मदर्शनं हस्ता मलकदर्शनवत् प्रत्यक्षं सोऽकरोत् तस्मादेव हेतोरि दन्द्रोनाम स परमात्मा । इदं ब्रह्म स्वात्मभूतं सर्वत्र व्याप्ततमं दृष्टवानितीदन्द्रः । एतमेवार्थं दृढयति इदन्द्रो हवा इति । हशब्दः प्रसिद्धिद्योतकः । वैशब्दोऽवधार णार्थः । इदन्द्र इति नाम परमात्मनः प्रसिद्धमिति निश्चितमित्यर्थः । तं परमात्मानमिदन्द्रं सन्तमेव इदन्द्रे ति प्रसिद्धनामविशिष्टमेव क्वचिद् इन्द्र इति नाम्नाऽपि परोक्षेण आचक्षतेवदन्ति ब्रह्मविदः । नाम्नः परोक्षत्वं रूपान्तरकरणेन वास्तविकस्वरूपाच्छादनमेव । इदन्द्र

इति वास्तविकनाम्नः स्वरूपमिन्द्र इति नामान्तरकरणेन भवत्याच्छादितम् । अतएव 'इन्द्रो मायाभिः पुरुरूप ईयत' इत्यादि श्रुतिषु इन्द्र इति परोक्षनाम्नैव निर्देशः परमात्मनो दृश्यते । साक्षादिदन्द्रपदेन कथन्न तत्कथनमित्यत्र हेतुमाह-परोक्षप्रिया इति । देवा इन्द्रादयः परोक्षप्रिया परोक्षेण नाम्ना स्वव्यपदेशं प्रियं मन्यन्त इति परोक्षप्रियाः । इवशब्दस्य क्वचित् प्रसिद्ध नाम्ना निर्देशेऽपि न क्षतिरित्यभिप्रायः । अतएव यागादिषु प्रसिद्धेनैव नाम्ना व्ययदेशेऽपि मनोहानिर्न भवति तेषाम् । इतरत्र तु देवराजादिनाम्नैव व्यपदेशः तेषां प्रियः । देवानामीदृशं परोक्षव्यपदेशप्रियत्वं चेत् सर्वदेवदेवस्य परमात्मनः परोक्षप्रियत्वमितिकिमुवक्तव्यम् । कैमुतिकन्यायसिद्धमेव परोक्षप्रियत्वं परमेश्वरस्येत्येतत् । लोकेऽपि पित्रुपाध्यायाद्यैः तदीयनाम्ना देवदत्तादिना व्यपदेशो न क्रियते विवेकिभिः तादृशव्यपदेशस्य पित्रुपाध्यायादीनामप्रियत्वात् । हिशब्दो हेत्वर्थकः । द्विरुक्तिरध्यायसमाप्तिसूचिका ॥३॥

卐 इति भगवद्रामानन्दाचार्यविरचिते ऐतरेयोपनिषद्भाष्ये
प्रथमेऽध्याये तृतीयः खण्डः ॥३॥ 卐

उस परमेश्वर ने ईक्षण अर्थात् संकल्प किया । मैंने अम्भः प्रभृतिक लोकों का तथा तत्र तत्र नियुज्यमान

अग्नि प्रभृतिक लोकपालों का सर्जन किया । और उन लोकपालों को अशनापिपासा संयुक्त भी कर दिया । इन लोकपालों को स्वाभिलषित उपभोग करने में उपयुक्त स्थान भी दिया । परन्तु उपभुज्यमान अन्न का यदि अभाव रहेगा तब इन लोकपालों का जोकि अशनापिपासा से व्याकुलित चित्तवाले रहेंगे तो इनका अवस्थान स्थिति किस प्रकार रहेगी तथा ये लोग स्वकियाधिकार लक्षण कार्य का संपादन किस तरह से करेंगे । कहा है-'**भूखे भजन न होई गोपाला, लेलो झोली पोथी माला ॥**' इसलिये इन लोकपालों के बुभुक्षादि शामक अन्न का सर्जन करुं अर्थात् अन्न का उत्पादन करुं ऐसा संकल्प किया । इसके वाद उस परमात्मा ने अप् जल को उद्देश्य करके अभिध्यान चिन्तन किया । यहां अप् शब्द पञ्चीकृत पञ्चभूतों का उपलक्षक है यथा-'**ततः स्वयं भूर्भगवान् सिसृक्षुर्विविधाः प्रजाः । अप एव ससर्जादौ तासु बीजमवासृजत् ॥**' इस मानवीय वाक्य में जलपद पञ्चभूत का उपलक्षक है उसी तरह प्रकृत में भी अप् पद पञ्चीकृत पञ्चभूतों का उपलक्षक है । ब्रीहि यवादिक जो अन्न हैं वह पञ्चीकृतभूतों से उत्पन्न हो 'इसप्रकार स्वसंकल्प का विषय जल को किया । अभितस ब्रीहि यवादिक अन्नोत्पाद विषयक संकल्प गोचरीभूत

अप् से मूर्ति अर्थात् घनीभूत शरीर धारण करने में समर्थ ब्रीहि यवादिक पदार्थों की उत्पत्ति हुई जिस तरह घनीभूत माण्ड-ओसावन से कठिन पिण्ड होता है उसी तरह घनीभूत जल से कठिन धारणादि क्रिया समर्थ पिण्ड की उत्पत्ति हुई। अब मूर्ति शब्द के अर्थ को श्रुति स्वयमेव बतलाती है-**'या वै सा मूर्तिः'** इत्यादि। जो यह मूर्ति चराचररूप है वह अन्न है। घासादिक अचरमूर्ति तथा विलाड व्याघ्रादिक के भक्ष्यरूप मूषिक हरिणादिक चरमूर्तिस्वरूप अन्न हुआ। लोकपालों की बुभुक्षा शान्ति के लिये परमात्मा ने इस अन्न को संकल्पित करके-विशेष रूपसे संपादित चराचर लक्षण अन्न हमको ये लोकपाल खा जायेंगे ऐसा समझ करके लोकपालों का अतिक्रमण करके (उनकी आंख को बचा करके) पलायन करने की इच्छा की।

प्रश्न-ब्रीहि प्रभृतिक जो अन्न है वह तो अचेतन पदार्थ है तब उसने लोकपालों की भोजन विषयक इच्छा को किस तरह जाना तथा एतादृश ज्ञानाभाव में लोकपालों की आँख बचा करके भागने का प्रयत्न कैसे किया ?

उत्तर-परमात्मा ने केवल ब्रीह्यादिकरूप अचेतन अन्न का ही सर्जन नहीं किया। किन्तु चेतन संयुक्त अन्न

का सर्जन किया । तो उस मूषिक बिलाडादि लक्षण चेतन अन्न में जिघित्सा का ज्ञान तथा-पलायनेच्छा भी बन सकती है । तादृश ज्ञानादिक का अचेतन में भी आरोप करके ब्रीह्यादिक में भी तादृश व्यवहार समुत्पन्न होता है-**'ता आप ऐक्षन्त'** इत्यादि व्यवहार तो श्रुति प्रसिद्ध ही है । **'तद्वाचेत्यादि'** वह पलायन परायण तो अन्न है लोक लोकपाल का कार्यकरण समुदायरूप प्रथमोत्पन्न हिरण्यगर्भ लक्षण पिण्ड पाणी व्यापारमात्र से उन अन्नों को ग्रहण करने का प्रयत्न किया । परन्तु वह प्रथमोत्पन्न पिण्ड वाग् व्यापारमात्र से ग्रहण करने में समर्थ नहीं हुआ ।

प्रश्न-वाणी से अन्न ग्रहण करने का जो प्रयत्न करना यह तो बन नहीं सकता है क्योंकि कोई भी प्राणी जो अतिक्षुद्र है पक्षि प्रभृतिक वह पदार्थ का ग्रहण करने के लिये प्रयतमान नहीं देखने में आता है सर्वप्रथम उत्पन्न होनेवाला समष्टि सर्ग लक्षण प्रजापति एतादृश अपटमान कार्य के लिये किस तरह प्रयत्न कर सकता है ?

उत्तर-सर्ग के आद्य समय में उत्पन्न मात्र वह प्रथमज पिण्ड अन्नादि भक्षण में शिक्षित नहीं था तथा भोजनानुभव शून्य था प्रथमज होने पर भी किस तरह अद्यतनीय रीति से ग्रहण करने में प्रवृत्त हो, इसलिये

अन्न ग्रहण के परिचय के लिये अयोग्य रीति से भी प्रयत्न किया चरमपर्याय में उस रीति से परिचित हो करके वह रीति लोकपालों में आई और आज भी आ रही है ।

यदि उस प्रथमज पिण्ड ने इस अन्न को वाग् व्यापारमात्र से ग्रहण किया होता तो उस प्रथमज पिण्ड का कार्यभूत सभी प्राणी उस अन्न को वाणी से कथन करके तृप्त होता परन्तु अन्न को व्याहृत करके कोई भी तृप्त होते हुए नहीं देखने में आता है इसलिये वाणी से अन्न ग्रहण करने में प्रथमज पिण्ड समर्थ नहीं हुआ । उसके वाद वह प्रथमज पिण्ड प्राण घ्राणेन्द्रिय व्यापार से अन्न को ग्रहण करने का प्रयत्न किया परन्तु उससे ग्रहण नहीं कर सका । यदि घ्राण व्यापार से ग्रहण किया होता तो तदुत्पन्न सब प्राणी अन्न को सूंघ करके ही तृप्त हो जाते परन्तु ऐसा देखने में नहीं आता है यह द्वितीय पर्याय का अर्थ है । उसके वाद उस प्रथमज पिण्ड ने चक्षु के व्यापार से अन्न ग्रहण करने के लिये प्रयत्न किया परन्तु उससे अन्न ग्रहण करने में समर्थ नहीं हुआ। यदि वह चक्षु से ग्रहण करने में समर्थ हुआ होता तो उससे शिक्षित सबलोग अन्न को चक्षु से देखकर तृप्त होता परन्तु ऐसा तो नहीं होता है । उसके

वाद श्रोत्र व्यापार से भी अन्न ग्रहण करने के लिये प्रयत्न किया परन्तु अन्न ग्रहण करने में समर्थ नहीं हुआ, यदि श्रोत्र व्यापार से वह समर्थ हुआ होता तो उससे शिक्षित सभी प्राणी सुन करके ही तृप्त हो जाते परन्तु ऐसा देखने में नहीं आता है तब उस प्रथम पिण्डज ने त्वगिन्द्रिय व्यापार से अन्नग्रहण करने का प्रयास किया परन्तु उसका वह प्रयास भी निरर्थक हो गया । यदि उसमें वह सफल हुआ होता तो आज भी अन्न का स्पर्श करके ही लोग सफल होते परन्तु तृप्त नहीं होते । तब मननात्मक मनोव्यापार से अन्न ग्रहण करने का प्रयास किया परन्तु सफल नहीं हुआ । यदि वह सफल हुआ होता आज भी मनन मात्र करके ही परितृप्त सब होता परन्तु ऐसा तो देखने में नहीं आता है । इसके वाद परित्यागात्मक शिश्न व्यापार से अन्न ग्रहण का प्रयास किया परन्तु उस प्रयास में सफल नहीं हुआ । यदि इस प्रकार से वह सफल हुआ होता तो आज भी लोग तादृश व्यापार से सफल होता परन्तु ऐसा तो देखने में नहीं आता है । उसके वाद अधोगमनशील मुख छिद्रगत अपान वायु के द्वारा अन्न ग्रहण करने का प्रयास किया तब उस प्रथम पिण्डज ने अन्न को ग्रहण किया अर्थात् अन्न को खाया । इसप्रकार से प्रयत्न करता हुआ प्रथमज

चरम पर्याय में समुचित रीति से परिचित हुआ। इसलिये आज भी लोग मुख छिद्रगत आघाताख्य वायु से अन्न का भक्षण करते हैं तथा तृप्त भी होते हैं। इसी अर्थ को दृढ करने के लिये कहते हैं-**'स एष'** इत्यादि। जो यह अपान वायु मुख छिद्रगत है वह अन्न का ग्राहक ग्रहण करनेवाला है अर्थात् अपान वायु ही अन्न का आदान ग्रहण करनेवाला है। अत एव अपान वायु अन्न जीवनक (अन्न ही है जीवन जिसका ऐसा) कहलाता है। जो यह अपान नामक वायु है वह अन्नायु (अन्न ही है आयु जिसकी) एतादृश अन्नायु कहलाता है। जो यह अन्न उपलब्ध होता है उसीसे यह अपान वायु स्थित रहता है अन्न के अभाव में अपान वायु की स्थिति असंभवित है। इसलिये अपान का जीवन साधन अन्न है।

वह परमात्मा लोक तथा लोकपाल सर्ग को बना करके और उसके जीवन के कारण अन्न का सर्ग करके लोकपालों से अधिष्ठित भी यह शरीरेन्द्रिय का समुदाय लक्षण पुर-नगर मेरे बिना किस तरह व्यवस्थित रहेगा जिस तरह पुर निवासी संयुक्त भी नगर पुर स्वामी शासक राजा के बिना चिरकाल तक अवस्थित नहीं रह सकता है। उसी तरह नौ द्वारवाला पुर के समान अवस्थित यह शरीर पुर स्वामी मेरे बिना चिरकाल तक

अवस्थित नहीं रह सकता है। इसलिये पुर में प्रविष्ट हो करके पुर स्वामी नगर में अवस्थित रहता है उसी तरह मैं भी नव द्वारक शरीर लक्षण पुर में अवस्थित होऊं यह अत्यावश्यक है। अन्यथा चिरकाल तक इस शरीर की स्थिरता नहीं होगी इसप्रकार से परमेश्वर ने विचार किया। इससे कार्य शरीर करण इन्द्रियों का परिपालन रूप स्वकीय प्रवेश का प्रयोजन बतलाया गया। एवं स्वप्रवेश के एक प्रयोजन का पर्यालोचन करके वक्ष्यमाण जो प्रयोजनान्तर उसकी उपेक्षा करके पहले पुर में प्रवेश के मार्ग को बतलाते हैं-सूची कटाह न्याय से-'**स ईक्षत**' इति। उस परमात्मा ने करण कलेवर का परिपालन लक्षण जो कार्य है वह मेरे बिना नहीं हो सकता है एतादृश पर्यालोचन के वाद में ईक्षण अर्थात् चिन्तन किया। क्या चिन्तन किया ? इस जिज्ञासा के उत्तर में कहते हैं-'**कतरेण प्रपद्या**' इति। किं सर्वनाम शब्द से डतरच् प्रत्यय हुआ है। दो संदिग्ध पदार्थों में से एक का निश्चय करने में यह डतरच् प्रत्यय अनुशिष्ट है इसलिये प्रवेश का दो मार्ग प्रकृत में विचारणीय है। इसमें एक मार्ग तो पाद का अग्रभाग है और दूसरा ब्रह्मरन्ध्र है। इन दो मार्गों में से किस मार्ग से प्रवेश करना चाहिये। इसप्रकार से परमेश्वर ने विचार किया।

यद्वा-'इस पुरुष में नौ द्वार हैं उसमें सात तो शिरोभाग में है और दो अधोभाग में है' इत्यादि श्रुति से तथा 'इस नौ द्वार वाला शरीररूप पुर में देही जीव' इत्यादि गीता कथन से कार्यकरण समुदायरूप इस कलेवर के नौ द्वार वाला होने से उन नौ द्वारों में से किस द्वार से प्रवेश करुँ इसप्रकार से विचार किया । अन्नपक्ष में कत रेण यहां जो डतरच् प्रत्यय है वह छान्दस है । लोक में तो अनेक के मध्य से एक का निर्धारण करने में डतरच् प्रत्यय का ही प्रतिपादन किया गया है । इसप्रकार से प्रवेश द्वार के विषय में चिन्ता करके द्वितीय प्रवेश के प्रयोजन का चिन्तन प्रकार को बतलाते हैं-'**स ईक्षत**' इत्यादि । उस परमात्मा ने मार्ग चिन्तन के अनन्तर ईक्षण विचार किया । क्या विचार किया ? इस जिज्ञासा के उत्तर में कहते हैं-'**यदि वाचाभिव्याहृतमित्यादि**' यदि मेरे बिना केवल वाणी व्यापार से ही अभिव्याहार लक्षण कार्य निष्पन्न हो जाय । यदि घ्राणेन्द्रिय मेरे बिना ही आघ्राणरूप कार्य को संपादित करले तो । और श्रोत्रेन्द्रिय मेरे बिना ही शब्द प्रत्यक्षात्मक कार्य को कर ले यदि मेरे बिना ही त्वगिन्द्रिय त्वाच प्रत्यक्षरूप स्व कीय कार्य का संपादन कर ले । एवं मन मेरे बिना मननात्मक स्वकीय कार्य का संपादन कर ले तथा पायु

इन्द्रिय सहचरित ओदनादिक वस्तु शरीरान्तर्गत भक्षित हो जाय तब मैं कौन होऊंगा अर्थात् किसका मैं स्वामी बनूँगा ? जिस तरह पुर स्वामी के बिना ही यदि पुर निवासी पुर नगर के कार्य का संपादन कर लें तो पुर स्वामी कुछ भी नहीं होता है उसी तरह मेरे बिना ही यदि प्राणादिक करण जात स्वकीय कार्य को संपादित कर ले तब तो मैं कोई नहीं होऊंगा न वा मैं पुर स्वामी बनूँगा। न वा मैं इन लोगों का शेषी अङ्गी बनूँगा न वा यह शरीर तथा शरीर के अन्तर्गत करण समुदाय तथा उन करणों के अधिष्ठाता देवलोग मेरे शेष अङ्ग होंगे किन्तु मैं सबका शेषी तथा सबके स्वामी होते हुए भी मुझे ये लोग कोई भी नहीं समझेंगे कि यह मेरे स्वामी हैं शेषी हैं और नियन्ता हैं इसलिये इस चीज को जानने के लिये सबका शेषी मैं स्वशरीररूप जीव द्वारा इस शरीर में अनुप्रवेश करुँ इसप्रकार से परमात्मा ने विचार किया। इससे स्वप्रवेश का द्वितीय प्रयोजन चिन्तित हुआ वह फलित होता है।

पूर्व प्रदर्शित मार्गों में पाद के अग्र लक्षण जो मार्ग है वह प्राण वायु का प्रवेश मार्ग है और मुखादिरूप जो प्रवेश का मार्ग है वह वागिन्द्रियों का प्रवेश मार्ग है प्राण वागादिक जो हैं वह परमात्मा के प्रेष्य मृत्यु के

अन्तर्गत है। इसलिये जिस तरह पुरस्वामी राजा भृत्य के प्रवेशमार्ग से नगर में प्रविष्ट नहीं होता है क्योंकि भृत्य मार्ग से जाने में राजा स्वकीय अपमान को समझता है इसी तरह सबके शासक परमात्मा ने भी स्वभृत्य वागा दिक के प्रवेश करने में उपयोगी जो मार्ग समुदाय उनमें से किसी भी मार्ग के द्वारा स्वकीय प्रवेश को उचित नहीं माना। तब परिशेषात् एक ब्रह्मरन्ध्र लक्षण मार्ग रहा। इस ब्रह्मरन्ध्र मार्ग से परमात्मा का भृत्य स्थानीय वागादिक कोई भी प्रवेश को प्राप्त नहीं कर सकता है जिस तरह पुरस्वामी राजा के प्रवेश मार्ग से पौरजनों का प्रवेश नहीं होता है। इसप्रकार विचार करके ब्रह्मरन्ध्र मार्ग से इस शरीर में प्रवेश करने का निश्चय किया और इस मस्तकगत सीमा को कपालद्वय की सन्धि को विदीर्ण पृथक् करके अर्थात् दलद्वय को विभक्त करके इसी छिद्ररूप मार्ग से इस कार्यकरण संघातात्मक शरीर में प्रवेश कर लिया। परमात्मा ने जो प्रवेश किया वह जीव द्वारा है **'अनेन जीवेनात्मना'** इत्यादि श्रुत्यन्तर में जीव शरीरक परमात्मा का अनुप्रवेश सुनने में आया है।

अब इस विलक्षण ब्रह्ममार्ग का नाम (संज्ञा) तथा गुण का निर्देश करने के लिये कहते हैं-**'सैषा विदृति**

रित्यादि' वह यह श्रुत्यन्तर में भी द्वार विदृति नामक है इसका विदृति ऐसा नाम हुआ उसका यह द्वार है। वह यह द्वार नान्दन द्वार कहलाता है। आनन्दित हो जिससे उसे नन्दन कहते हैं उसी को नान्दन कहते हैं इसी नान्दन द्वार से शरीर से गया हुआ परमात्मा का एकान्त उपासक मोक्षस्थान को प्राप्त करता है अर्थात् आनन्दमय परमात्मा को प्राप्तकर जाता है तदनन्तर आनन्दित होता है तथा परमात्म स्वरूप परमानन्द का अनुभव करता है। अतः परमानन्दानुभव का साधन यह होता है इस लिये इस द्वार को नान्दन कहते हैं। अथवा प्रकृत द्वार का यह भी एक नामान्तर ही है ऐसा उस द्वार को मानना चाहिये। शरीर प्रवेश के लिये जो मुख प्रभृतिक मार्ग है वह आनन्द का कारण नहीं है क्योंकि मुखादि मार्ग द्वारा शरीर से निष्क्रमण करने वाले को मोक्षस्थान की प्राप्ति होती है ऐसा शास्त्र में कही भी श्रुत नहीं है। किन्तु-**'विष्वङन्या उत्क्रमणे भवन्ति'** इत्यादि श्रुत्यन्तर में मोक्षेतर स्थान प्राप्ति का कथन किया गया है। ब्रह्मरन्ध्र नान्दन मार्ग में तो-**'तयोर्ध्वमायन्नमृतत्वमेति'** इस श्रुति में अमृतत्वोपायता का कथन किया है इसलिये इसका नान्दन यह नाम कहना उचित है किन्तु मुखादि मार्ग में अमृतत्व साधकता नहीं होने से नान्दन व्यवहार

अनुपयुक्त है। जीव शरीरक परमेश्वर इस शरीर में अनुप्रवेश करते हैं ऐसा जाना गया।

परन्तु परमात्मा शरीर में प्रविष्ट हो करके शरीर के किस भाग में रहते हैं वह कहना चाहिये क्योंकि यह आकांक्षित है निराकांक्ष का कथन अनुपयोगी होता है नतु साकांक्ष का कथन निरुपयोगी होता है इस शंका का निराकरण करने के लिये कहते हैं-**'तस्य त्रय आवसथा'** इत्यादि। जीवरूप आत्मा के द्वारा इस शरीर में अनुप्रविष्ट परमात्मा का तीन आवसथ अर्थात् निवास स्थान होता है इस शरीर में। कभी तो दक्षिण नेत्र में कदाचित् कण्ठ में कदाचित् हृदय कमल के कर्णिका अग्रभाग निवासस्थान होता है। जीव में जाग्रत् स्वप्न और सुषुप्ति ये तीन दशा होती हैं। इनका निर्वाहक तत्तत् शरीररूप से तत्तत् स्थान में यह परमात्मा अवस्थित होते हैं। तथा-**'त्रयः स्वप्नाः'** इति जिस तरह स्वप्न सदृश तीन स्वप्न पृथक् रूपसे आश्चर्यजनक पदार्थ को बतलाता है उसी तरह तीनों प्रकार के आवसथ आश्चर्यजनक होते हैं। अर्थात् जाग्रत् स्वप्न सुषुप्ति के भेद से तीनों निवास स्थान इसका स्वप्न सदृश आश्चर्य जनक है। इन आवसथों का प्रसिद्ध वत् निर्देश करते हैं-**'अयमावसथ'** इत्यादि। जिस तरह राजा तत्तत्

स्थान में रह करके राज्य शासन श्रौतस्मार्त क्रिया और अन्तःपुरवर्ग का रञ्जनात्मक कार्य को करता है उसी तरह शरीर में अनुप्रविष्ट जीव शरीरक परमात्मा भी जाग्रदाद्य. वस्था में अक्ष्यादि स्थान स्थित हो करके जीव के तत्तत् कार्य के निर्वाहक होते हैं।

वह परमात्मा जीवरूप आत्मा से शरीर में अनुप्रविष्ट हो करके पञ्चीकृत पृथिव्यादिभूतों के नामरूप को व्याकृत किया। अर्थात् जीव शरीरक परमात्मा शरीर में अनुप्रविष्ट हो करके पृथिव्यादिभूतों के नामरूप का संपादन किया। मेरा अनुप्रवेश विशिष्ट संपूर्ण इस जगत् में हमसे अन्य के समान क्या कोई कह सकता है। शरीर तथा शरीरीभाव से मैं सर्वत्र अवस्थित हूँ। इस लिये संपूर्ण यह प्रपञ्च मेरा स्वरूप ही है। इस स्थिति में कौन ऐसा शब्द है जो मुझसे भिन्न के समान इस प्रपञ्च का कथन करने में समर्थ होगा। **वा** शब्द इव शब्द के समानार्थक है-'**अवदिषत्**' यह छान्दस प्रयोग है। प्रकारभाव प्राप्त सब अचेतन में प्रकारीरूप से अवस्थित मैं ही हूँ, अन्य कोई नहीं है ऐसा निश्चय किया। इस तरह अचेतन में प्रकारीरूप से व्यवस्थित परमेश्वर ने चेतन में भी प्रकारीरूप से अवस्थित स्व को ही देखा।

समस्त सृष्टि का कर्ता वही परमात्मा हैं इस बात को बतलाते हैं-**'स एतमेवेत्यादि'** उस परमेश्वर परमपुरुष ने इसे सर्गकर्तृतया प्रकृत इस पुरुष को अर्थात् स्व को ही तत् व्याप्त देखा। चेतनाचेतन सब पदार्थ में प्रकारीरूप से वर्तमान होने से अतिशयेन व्याप्त को ब्रह्म स्वरूप तथा गुण से निरतिशय वृहत्वयुक्त को देखा। अर्थात् व्याप्त ब्रह्मरूप से अपने स्वरूप को ही देखा। **'ततमम्'** यहां एक तकार के छान्दस होने से लोप हो गया है **'तततमम्'** ऐसा पद का आकार था विस्तारार्थक तत् धातु का व्याप्तिरूप अर्थ है अतः व्याप्त तमम् यह अर्थ फलित होता है अर्थात् व्याप्ततम ब्रह्म को देखा। उसमें दर्शनाकार का कथन करते हैं-**'इदमदर्शमिति'** इस व्याप्ततम ब्रह्म वृहत्तम वस्तु को मैंने देखा यह उसका अर्थ है। इति शब्द **'इदमदर्शम्'** इत्याकारक दर्शन स्वरूप का निर्देश करता है। यहां प्लुतत्व का जो विधान है वह हर्ष का सूचक है। सभी जगह में स्वात्म प्रदर्शन हर्ष का हेतु होता है। इस तरह से चेतन तथा अचेतन पदार्थ के प्रकारीभूत स्वस्वरूप का प्रदर्शन करके सब जगह में इदन्ता रूपसे स्वद्रष्टृत्व निमित्तक नाम का निर्वचन करते हैं-**'तस्मादिदन्द्रोनामेति'** जिस कारण से इदन्ता रूपसे हस्तामलक दर्शनवत् स्वात्मा का दर्शन

प्रत्यक्ष रूपसे किया। इसी कारण से इदन्द्र यह परमात्मा का नाम है। स्वात्मभूत इस ब्रह्म को सर्वत्र व्याप्ततम देखा इसलिये इदन्द्र है। इसी वस्तु को दृढ करने के लिये कहते हैं-**'इदन्द्रो ह वा'** इति। यहां ह शब्द प्रसिद्धि का द्योतक है और वै शब्द निर्धारणार्थक है। इदन्द्र इत्याकारक नाम परमात्मा का प्रसिद्ध है अर्थात् निश्चित है। इदन्द्र इत्याकारक प्रसिद्ध नामविशिष्ट परमात्मा को किसी किसी स्थल में इन्द्ररूप से भी ब्रह्मज्ञानी लोग कहते हैं परोक्ष रूपसे। नाम में परोक्षत्व क्या है तो रूपान्तर करके वास्तविकरूप का आच्छादन कारण ही है। इदन्द्र इस वास्तविक नाम का जो स्वरूप है उसका इन्द्र एतादृश नामान्तर करने से आच्छादन होता है। अत एव **'इन्द्रोमायाभिः'** इस श्रुति में परमात्मा का परोक्ष नाम से ही निर्देश किया गया है। परोक्ष रूपसे कथन करने में कारण बतलाते हैं-**'परोक्षप्रिया'** इत्यादि। देवता इन्द्र प्रभृति देवगण परोक्ष नाम से स्वकीय व्यवहार को प्रिय मानते हैं इसलिये देवतागण परोक्षप्रिय कहलाते हैं। इव शब्द का यह अभिप्राय है कि स्थल विशेष में प्रसिद्ध नाम से व्यवहार करने में भी कोई क्षति नहीं है। अत एव यागादिक में प्रसिद्ध नाम से निर्देश करने में भी कोई

क्षति नहीं होती है। अन्यत्र तो देवराज इत्यादि नाम व्यवहार ही देवों को प्रिय होता है। जब देवों में एतादृश परोक्ष व्यपदेश प्रिय है तब देवाधिदेव परमात्मा को परोक्ष प्रियत्व हो तो कहना ही क्या है अर्थात् कैमुतिक न्याय सिद्ध ही परमेश्वर में परोक्षप्रियत्व है। लोक में भी पिता आचार्यादि का तत्तन्नाम से व्यवहार नहीं करते हैं क्योंकि तेनरूपेण व्यवहार उनको प्रिय नहीं होता है। हि शब्द हेत्वर्थक है। द्विर्वचन अध्याय की समाप्ति का सूचक है ॥३॥

❀ श्रीमदानन्दभाष्यप्रकाशे तृतीयः खण्डः ❀

卐 अथ चतुर्थः खण्डः 卐

पुरुषे ह वा अयमादितो गर्भो भवति यदेतद्रेतः। तदेतत् सर्वेभ्योऽङ्गेभ्यस्तेजः संभूतमात्मन्येवात्मानं विभर्ति। तद् यदा स्त्रियां सिञ्चति। अथैतज्जनयति। तदस्य प्रथमं जन्म।

तत् स्त्रिया आत्मभूयं गच्छति। यथा स्वमङ्गं तथा। तस्मादेनां न हिनस्ति। साऽस्यैतमात्मानमत्रगतं भावयति। सा भावयित्री

भावयितव्या भवति । तं स्त्री गर्भं विभर्त्ति । सोऽग्र एव कुमारं जन्मनोऽग्रेऽधिभावयति । स यत्कुमारं जन्मनोऽग्रेऽधिभावयति । आत्मानमेव तद् भावयति एषां लोकानां सन्तत्यै । एवं सन्तता हीमे लोकाः । तदस्य द्वितीयं जन्म ।

सोऽस्यायमात्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयते । अथास्यायमितर आत्मा कृतकृत्यो वायो गतः प्रैति स इतः प्रयन्नेव पुनर्जायते । तदस्य तृतीयं जन्म ।

तदुक्तमृषिणा-गर्भेनुसन्नन्वेषामवेदमहं देवानां जनिमानि विश्वा । शतं मा पुर आयसीररक्षन्नथ श्येनो जवसानिरदीयमिति । गर्भ एवैतच्छयानो वामदेव एवमुवाच ।

स एवं विद्वानस्माच्छरीरभेदादूर्ध्वमुत्क्रम्यामुष्मिन् स्वर्गेलोके सर्वान् कामानाप्त्वाऽमृतः समभवत् । समभवत् ॥४॥

卐 इत्यैतरेयोपनिषदि द्वितीयोऽध्यायः ॥२॥ 卐

प्रसिद्ध संसारी यह जीव पहले पुरुष शरीर में ही वीर्य रूपसे गर्भतया रहता है यह जो पुरुष के शरीर में वीर्य है वह पुरुष के सभी अंगों से समुत्पन्न तेज है पुरुष स्वरूपभूत तेज को पहले स्वशरीर में ही धारण करता है जब उस वीर्य को स्त्री में सिंचन करता है तब उसे उत्पन्न करता है वह इस पुरुष का प्रथम जन्म है। वह गर्भ स्त्री के आत्म स्वरूप हो जाता है जैसे अपने अंग होते हैं वैसे ही अतः वह गर्भिणी स्त्री को गर्भ पीडा नहीं देता है वह गर्भिणी भी अपने शरीर स्थित इस स्व पति के आत्मारूप गर्भ को यत्नपूर्वक पालन पोषण करती है।

धारित गर्भ का संपोषण करनेवाली वह स्त्री पति से संपोषण योग्य होती है गर्भिणी स्त्री उस गर्भ को जन्म से पूर्व धारण-पोषण करती है जन्म के वाद उस कुमार का पिता जातकर्मादि से संस्कृत करता है बालक का पिता जन्म से पूर्व एवं वाद में भी विविध संस्कारों द्वारा समुन्नत करता है वह इन संसार के मानवों को संतती के द्वारा बढाने से अपनी ही उन्नती करता है क्योंकि दूसरी प्रकार से सभी लोग विस्तृत हुये हैं अतः गर्भ से बाहर आना इस पुरुष का द्वितीय जन्म है।

इस पिता का प्रसिद्ध यह आत्मा पुण्यकर्मों के हेतु प्रतिनिधि के रूपमें नियत किया जाता है वाद में इस पुत्र का यह पिता स्वरूप दूसरी आत्मा स्वकर्तव्य पूर्ण करके आयुपूर्ण हो जाने पर यहां से जाता है वह पिता यहां से जाते हुये भी पुनः उत्पन्न होता है यही संसारी मानव का तृतीय जन्म है।

यही पूर्व विवरण को मन्त्रद्रष्टा ऋषि ने कहा है अहो मैंने गर्भ में ही इन अग्नि प्रभृति सभी देवों के संपूर्ण जन्म कर्मों को अवगत करलिया मुझे सैकडों लोहे के सदृश कठिन शरीर में आरक्षित कर रखा था अव वाज पक्षी के समान अतिवेग से बन्धन तोडकर बाहर

आया हूँ माता के गर्भ में सोते हुये ही वामदेव ऋषि ने इसप्रकार से कही।

पूर्वोक्त रूपसे जन्म तथा मृत्यु के तत्वों के ज्ञाता वह ऋषि इस शरीर के नष्ट होने पर ऊर्ध्वगति से निकल कर उस स्वर्गलोक में जाकर सभी कामनओं को प्राप्त कर अमृत हो गया ॥४॥

पूर्वं हिरण्यगर्भमारभ्य देवादिव्यष्टिसृष्टिं प्रतिपाद्य जीवात्मना तत्र परमात्मनोऽनुप्रवेश इत्यादिवर्णितम्। संप्रति याथात्म्येनात्मतत्त्वाऽपरिज्ञाननिमित्तं संसरतो जीवस्य वैराग्योत्पादनाय जन्ममरणपरम्परां दुःखप्रधानां दर्शयति श्रुतिः-पुरुषे हवेत्यादिः। कर्मानुसारेण तेषु तेषु लोकेषु तत्तत्कर्मोपभोगाय परिभ्राम्यन् संसारी जीव आदितः प्रथमतः पुरुषे पुरुषाकारशरीरे गर्भो भवति गर्भस्वरूपेण तिष्ठति। गर्भशब्दार्थं विवृणोति स्वयमेव श्रुतिः-यद् रेतोऽन्नपरिणामभूतं रेतो वीर्यं चरमो धातुरेव गर्भ इत्येतत्। रेतसो गर्भत्वकथनं पुरुषशरीरान्तर्गतत्वाभिप्रायेण। प्रथमत इत्यनेन स्त्रियां सेकात् पूर्वमित्यर्थो विवक्षितः। रेतः स्वरूपेण गर्भो भवतीत्येतत्। जीवस्य रेतोरूपेण भवनं स्फुटयति तदेतदिति। तदेतद् रेतोऽन्नपरिणामरूपं पुरुषस्य सर्वेभ्योऽङ्गेभ्यः शरीरावयवेभ्यो हस्तादिभ्यः संभूतमेकत्रीभूतं तेज एव सारभूतश्चरमधातुरेव। तद्रेत आत्मन्येव स्वस्वरूपे एव आत्मानं देहान्तरमापतस्यमानं जीवं वि

भर्ति धारयति । देहान्तरं समुपादित्सुर्जीवो रेतसा संपृक्त एव तिष्ठति । रेतस्येव वर्तत इत्येतत् । तद् रेतः यदा यस्मिन् काले भार्याया ऋतुकाले इत्येतत् । स्त्रियां भार्यायां सिञ्चति पुमान् विसृजति तदीय योनौ । अथ सेकानन्तरमेतद् रेतो जनयति गर्भरूपमुत्पादयति । अस्य जीवस्य तदेव प्रथमं जन्म रेतः सेक एव गर्भात्मना प्रथमं जननम् । प्रथमावस्थाभिव्यक्तिजनकत्वात् सेकस्यप्रथमजन्मत्वकथनम् । रेतोरूपेण भवनवर्थनं तु वैराग्यसमुत्पादाय । वीभत्सवस्तुदर्शनस्य वैराग्यहेतुता लोकप्रसिद्धैव ।

तत् स्त्रीयोनौ निषिक्तं रेतः स्त्रिया यस्यां निषिक्तं तस्याः स्त्रिया आत्मभूयं गच्छति आत्मभावं प्राप्नोति । अत्रात्मशब्द आत्मीयपरः स्वमङ्गमितिदृष्टान्तानुसारादङ्गभावं गतं भवति । तत्र दृष्टान्तं कथयति यथेति । यथा स्वमात्मीयमङ्गमुदरादि । तस्माद् यतोऽङ्गभावं प्राप्नोति तद्रेतः तस्मादेव हेतोः गर्भरूपेण परिणतं गुरुभूतमपि तद् एनामङ्गीभूतां स्त्रियं न हिनस्ति न पीडयति । स्तनोदरादिकं गुरुभूतमप्यङ्गमङ्गिनं तदाश्रयभूतं स्त्रीशरीरं यथा न बाधते तथा गर्भाकारपरिणतं गुरुभूतं भवदपि रेतः स्त्रीयोनिस्थं स्त्रियं न बाधते इत्यभिप्रायः । सा गर्भवती स्त्री अत्र गतं स्वशरीरे

प्रविष्टमस्य पुरुषस्य एतं रेतोरूपं पुत्ररूपमित्येतत् । आत्मानं स्वरूपं भावयति सम्वर्धयति परिपोषयति गर्भप्रतिकूलभोजनपानादिपरित्यागमनूकूलाशनपानादिकञ्च कुर्वाणा । यतस्तस्माद् भर्तुरात्मभूतस्य गर्भस्य भावयित्री संपोषणकारिणी सा स्त्री भर्त्राऽपि भावनीया पालनीया तदीप्सितवस्तुसमुपस्थापनद्वारा संमान्या भवति । भर्तुरात्मभूतगर्भपालनं कुर्वती स्त्री तदुपकारिका भवति अतस्तां प्रति प्रत्युपकारो भर्त्राऽपि तदिष्टभक्ष्यादिप्रदानद्वारा कर्तव्य एवेतिभावः । स्त्री गर्भिणी नारी तं रेतोरूपेण प्रविष्टं भर्तुः स्वरूपभूतं गर्भमग्रे उत्पत्तेः प्राग् गर्भनिष्क्रमणात् पूर्वमित्येतत् । विभर्ति विरुद्धपरित्यागानुकूलसेवनादिना पालयति । सोऽग्रे इत्यत्र श्रूयमाणस्य अग्रेपदस्य व्यवहितस्यापि अपकर्षेणात्र वाक्येऽन्वयः । स पिता तं कुमारं जन्मनो मातुरुदरान्निष्क्रमणादनन्तरमग्रे एव जातमात्रमेवेत्येतत् । अधिभावयति जातकर्मादिना संस्कारेण परिरक्षति । स पिता कुमारमुत्पन्नं पुत्रं प्रथमं जातकर्मादिना ततो यज्ञोपवीतादिना संस्कारेण यदधिभावयति परिपालयति तदात्मानमेव स्वमेव भावयति स्वस्यैव रेतोरूपेण स्त्रियां प्रविष्टत्वात् । भवति च श्रुतिः 'पतिर्जायां प्रविशति' इत्यादिः । स पिता पुत्ररूपेण समुत्पाद्य

स्वात्मानं भावयति तत्कस्य हेतोरित्याकांक्षायामाह-एषामिति । एषां लोकानां सन्तत्यै सन्ततिरविच्छेदः परम्परायाः तस्यैतदर्थमित्येतत् । पुत्रोत्पादनादिपरित्यागे हि तत्परम्पराविच्छेदाल्लोकविच्छेद एवापतेत् । तदविच्छेदे हि पुत्रपौत्रादिपरम्परया लोकाः सन्तता भवन्ति । जीवस्य द्वितीयजन्मप्रतिपादनार्थमयं प्रपञ्चो दर्शितः ततः पुत्रस्वरूपेण मातुरुदरतो बहिरागमनमेव द्वितीयं जन्म रेतोरूपेण तत्र प्रवेशः प्रथमं जन्मोक्तं तदपेक्ष्यास्य द्वितीयत्वं तदनन्तरभावित्वात् पुत्ररूपेण निष्क्रमणस्य ।

अस्य पितुः स जातकर्मादिना संस्कारेण तदनन्तरमुपवीतविवाहादिसंस्कारेण चाधिभावितोऽयं पुत्ररूपेणावस्थित आत्मा द्वितीयं स्वरूपम् । पुण्येभ्यः श्रुतिस्मृतिप्रतिपादितेभ्यः कर्मभ्यः प्रतिधीयते प्रतिनिधिर्विधीयते पित्रेति शेषः । पित्रा करणीयं शास्त्रीयं लौकिकञ्च कम कर्तु तत्स्थाने पुत्रोऽभिषिच्यत इत्यर्थः। अतएव पित्राऽकृतमवश्यकरणीयं कर्म यदि पुत्रेण क्रियते तत् पित्रैव कृतं मन्यते लोकैः । श्रुतिरपि संप्रति विद्यायामेव प्रतिपादयति तद् यथा-अथातः संप्रत्तिर्यदा प्रैष्यन्मन्यतेऽथ पुत्रमाह त्वं ब्रह्म त्वं यज्ञः त्वं लोक इति स पुत्रः प्रत्याह-अहं ब्रह्म अहं यज्ञोऽहं

लोक इति । यदा पिता स्वकीयं परलोकगमनं निश्चि नोति तदा पुत्रं वदति मत्कर्तव्यानि वेदाध्ययन यज्ञलोकसंपादनानि त्वयैवातः परं कार्याणीति, पुत्रस्तु सर्वमपि भवत्करणीयमहं करिष्य इत्युत्तरयतीति संप्र त्तिविद्याभावार्थः । एतावता प्रबन्धेन प्रथमद्वितीय जन्मनोस्तदनन्तरं पितृसंपाद्यकर्मकरणमारक्ष्य दुःखबहु लत्वं प्रतिपादितं तच्चिन्तनेन वैराग्यसिद्धिर्यथा स्या दित्येतदर्थम् ।

अथ जन्मद्वयकथनानन्तरं तृतीयं जन्मोच्यत इत्य भिसम्बन्धः । अस्य पुत्रस्य इतरो द्वितीयोऽयमात्मा । पितृस्वरूपः, पितापुत्रयोरैक्यमाश्रित्यास्येतर आत्मेति कथनम् । कृतकृत्यः कर्तव्यकर्मणां करणाय पुत्रस्य प्रतिनिधित्वकरणात् सर्वभारस्य तत्रारोपेण निश्चिन्तो भूत्वा अकृतमपि कृत्यं कृतमेव मन्वान इत्येतत् । वयोगतो जीर्णशरीरः प्रैति समुपात्तं शरीरं परित्यजति म्रियत इत्येतत् । तदा स पिता इतोऽस्माच्छरीरा-न्निर्गच्छन्नेव पुनर्जायते शरीरान्तरं गृह्णाति । अस्य संस रतो जीवस्य तत् प्रेत्य पुनर्भवनरूपं तृतीयं जन्म, तृणजलौकान्यायेन अपरं शरीरं परिगृह्णन्नेव पूर्वं शरीरं त्यजति, नात्र विलम्बो भवति इत्यभिप्रायः 'प्रयन्नेव पुनर्जायते' इत्यस्य । अत्र यद्यपि पुत्रस्यैव तृतीयं

जन्मदर्शयितुमुचितं तस्यैव प्रथमद्वितीयजन्मनी यतः पूर्वं प्रदर्शिते तथापि पितुरपि तृतीयजन्मकथने पुत्रे तस्योक्तत्वसंभवः पुत्रस्यापि स्वपुत्रे भारनिक्षेपपूर्वक पूर्वशरीरत्यागेनोत्तरशरीरपरिग्रहस्यावश्यकर्त्तव्यत्व-मेकत्रोक्तमन्यत्रापि अतिदिश्यते इति न्यायात् । पिता पुत्रयोरैकात्म्यमत्र विवक्षितमिति कथितमेव पूर्वम् ।

तदेतद् वस्तु ऋषिणा मन्त्रेण वक्ष्यमाणेन ऋषि पदमृषिदृष्टमन्त्रस्योपलक्षकम् । तथा परमर्षिवामदेव दृष्टेन मन्त्रेणापि अयमर्थ उक्त इत्यर्थः । अहं वामदेव ऋषिर्गर्भे सन् गर्भगत एव एषां देवानामग्न्यादीनां विश्वा विश्वानि समग्राणि जनिमानि जन्मानि अन्ववेदं पूर्वजन्मसमुद्भूतभावनाप्रकर्षमाहात्म्यादनुभूतवानस्मि । नुशब्दो वितर्कद्योतनाय । शतं शतसंख्याका अनन्ता इत्येतत् । आयसीरयस इमा आयसीर्लौहनिर्मिता इव पुरः पुरसादृश्यात् पुरः शरीराणि अरक्षन् रक्षितवत्यः । संसारबन्धनिर्गमप्रतिबन्धमकुर्वन्नित्येतत् । यथा संसारपाशादहं निर्गतो भवेयं तथा निगडितं कृतवत्य इति भावः । तदपि न शुभे स्थाने किन्तु निकृष्ट ए-वेत्याह-अधोऽधोयोनिषु यत्रात्मतत्त्वज्ञानप्रसङ्ग एव नोद्भवेत् तादृशीषु योनिषु बद्ध आसमिति । आयसी रित्यत्र प्रथमार्थे द्वितीयाविभक्तिव्यत्ययश्छान्दसः । प

रन्तु संप्रति परमकृपालुगुरूपदेशजनितात्मतत्त्वपरिज्ञानसामर्थ्यजन्मना जवसा वेगेन श्येनः श्येन इव निरदीयं निर्गतोऽस्मि । श्येनो यथा वेगेन जालं विदार्य बन्धनतो निर्गच्छति तथाऽहमप्यात्मज्ञानसामर्थ्येन वेग तः संसारबन्धनं विभिद्य निर्गतो मुक्तोऽभवमितिभा वः। इतिशब्दो मन्त्रस्वरूपनिर्देशकः । गर्भेमातुर्गर्भा शये एव शयानो वर्तमानो वामदेवो वामदेवनामर्षिरेव मनेन प्रकारेण उक्तमन्त्ररूपं वाक्यमित्येतदुवाच ।

परमात्मतत्वज्ञानमव्यभिचारेणाऽमृतत्वसाधनमिति दर्शयितुं श्रुतिः स्वयमाह-स एवमिति । स वामदेव ऋषिरेवं विद्वान् लोकलोकपालादिसर्जकत्वेन सर्वस्य प्रपञ्चस्य प्रकारितया च परमात्मानं जानन् साक्षात्कुर्वन्नित्येतत् । अस्माच्छरीरभेदादूर्ध्वं प्रारब्धकर्माविनाशे सति वर्तमानशरीरपातादनन्तरमुत्क्रम्य मूर्धन्यया नाड्या शरीरान्निष्क्रम्य अर्चिरादिना देवपथा अमुष्मिन् स्वर्गे लोके अप्राकृते देशे साकेतशब्दाभिलप्ये लोके भगवद्धाम्नि दुःखगन्धशून्ये गत्वा तत्र सर्वान् कामान् मुक्तात्मभिः काम्यमानानपहतपाप्मत्वादिकान् कल्याणगुणानाप्त्वा परमात्मना सहैव लब्ध्वा तदनुभवं कुर्वाण इत्येतत् । अमृतः समभवद् मुक्तो जातः । एतेनात्मतत्त्वज्ञानविधुरा

पुत्रादिष्वेवात्मभावं मन्यमानाः संसारमहार्णवे पतिताःपरिशोचन्तीत्यर्थोऽभिव्यज्यते सोऽपि वैराग्योत्पादहेतुर्भवति ॥४॥

卐 इति श्रीभगवद्रामानन्दाचार्यविरचिते ऐतरेयोपनिषद्भाष्ये द्वितीयोऽध्यायः ॥२॥ 卐

पूर्व में हिरण्यगर्भ से लेकर के देवादि व्यष्टि सृष्टि का प्रतिपादन करके जीवात्मरूप से परमात्मा के अनुप्रवेश का वर्णन किया गया। संप्रति आत्मा के याथातथ्य रूपसे अज्ञानवान् व्यक्ति को अज्ञान निमित्तक संसार को प्राप्त करने वाले जीव के वैराग्य का उत्पादन करने के दुःख प्रधानक जन्ममरण परम्परा का प्रदर्शन श्रुति करती है **'पुरुषे ह वा'** इत्यादि। कर्मानुसार से तत्तत् लोक में तत्तत् कर्मफल के उपभोग करने के लिये परिभ्रमण करता हुआ संसारी जीव का प्रथमतः पुरुषाकार शरीर में गर्भ होता है अर्थात् गर्भरूप से अवस्थित रहता है। गर्भ शब्द के अर्थ का विवरण श्रुति स्वयमेव करती है-**'यदेतद्रेतः'** इति। जो यह रेतस् पितृ भुक्त अन्न का परिणामरूप वीर्य है वही गर्भ शब्द का अर्थ है। रेतस् को जो गर्भ कहा है वह पुरुष के शरीरान्तर्गत होने के कारण से **'प्रथमतः'** इससे स्त्री में सेक से पूर्व में यह अर्थ विवक्षित है अर्थात् रेतस् स्वरूए से गर्भ

होता है । जीव के रेतस् स्वरूप से होने को श्रुति स्वय मेव स्पष्ट करती है-**'तदेतदित्यादि'** अन्न का परिणामरूप रेतस् पुरुष के सर्व अंग से शरीरावयव से संभूत एकत्रि भूत जो तेज शरीर के सारभूत चरम धातु है । वह रेतस् आत्मा में स्वस्वरूप में ही आत्मा को देहान्तर को प्राप्त करने वाले जीव को धारण करता है अर्थात् देहान्तर को प्राप्त करने की इच्छा वाला जीव रेतस् संपृक्त हो करके ही अवस्थित रहता है रेतस् में रहता है । वह रेतस् स्त्री के ऋतुकाल में जब स्त्री में पुरुष रेतस् का सिञ्चन करता है तब यह रेतस् गर्भ को उत्पन्न करता है इस जीव का वही प्राथमिक जन्म है । रेतः सेक ही गर्भरूप से प्रथम जन्म है प्रथमावस्था की अभिव्यक्ति के जनक होने से सेक को प्रथम जन्म कहते हैं । रेतोरूप से समुत्पत्ति का जो वर्णन किया गया है वह जीव के वैराग्य के उत्पादन करने के लिये है । कुत्सित वस्तु का दर्शन वैराग्य का उत्पादक होता है ऐसा लोक में भी प्रसिद्ध है ।

